कामेश्वर पंचांग

कामेश्वर पंचांग

नं० १०५४

नं. १०५४ — क
[illegible]
[illegible]

5522
Part 1st. F – 9
Part 2nd F – 47
Part 3rd F – 3
Total 59
Complete

काश्मेश्वरपंचांग

का० प० १

ॐश्रीगुरवेशिवायोंनमः॥श्रीकामेश्वरभैरवायनमः॥श्रीदेव्युवाच॥ॐपंचांगंदेवदेवस्य
श्रोतुमिच्छाम्यहंप्रभो॥कामेश्वरस्यदेवस्यवक्तुमर्हसिसांप्रतं॥श्रीभैरवउवाच॥परेश्वरस्य
देवस्यमहाकामेश्वरस्यते॥भक्त्यावक्ष्यामिपंचांगंनाख्येयंयस्यकस्यचित्॥२॥पटलंपद्धतिं
वर्ममंत्रनामसहस्रकं॥स्तोत्रंमंत्रांगभूतंचगोपयेद्यःससाधकः॥३॥तत्रादौपटलंवक्ष्येदीक्षा
नायकवल्लभे॥गोप्यंपरमगुह्यंचगोप्तव्यंचस्वमंत्रिभिः॥४॥मंत्रोद्धारंप्रवक्ष्यामिकामेश्वरस्य
तेप्रिये॥वाग्भवंकामराजंचशक्तिस्तारंतथैवच॥५॥लक्ष्मीलज्जामहेशानिकूटत्रितयमेवच
कांतिःशरेनिर्जराणांडलिर्मोहकवैश्यकौ॥६॥मंत्रोतकेशवीजंस्यादादिकूटोयमीरितः॥श
क्तिःकांतिःस्वरोभेकीधांतजीमूतवह्नयः॥वायुकेशौद्वितीयंस्यात्कूटराजोनवाक्षरः॥वायुर्वे
ह्निस्तमोप्यंबुदेवभेकार्णावायवः॥सकचानित्यदेवस्यकूटोयंस्यात्तृतीयकः॥तारंलज्जाचल
क्ष्मीश्चप्रणवंशक्तिरेवच॥कामराजंचवाणीचपश्चात्नामसमर्पयेत्॥ध्यान्मंत्रंचततोदद्यान्मं

प्रकाशम्

— ऐं क्लीं सौं ओं ह्रीं श्रीं हसकलमलवरयऊं सहकलमलवरयऊं यरलवक्षमवयऊं ओं ह्रीं श्रीं क्लीं ओं सौं क्लीं ऐं कामेश्वराय नमः ॥

ज्ञेयसौरितः प्रिये ॥ चतुर्विंशाक्षरा विद्या त्रिकूटा कामदेवता ॥ कामेश्वरस्य देवस्य गोपनीयं प्रयत्नतः ॥ राज्यं देयं शिरो देयं देया मंयत्स दार्थिने ॥ वस्त्रपूर्णं गृहं देयं न देयं मंत्रराजकं ॥ गोप्यं गोप्यतमं गुह्यं गुह्यं च शरजन्मनः ॥ गुह्याति गुह्यं गोप्तव्यं साधकाग्रेन गोपयेत् ॥ अस्य श्रीमंत्रराजस्य दोषो नैव च विद्यते ॥ मंत्रोत्कीलनदोषो वा मंत्रसंजीवनस्य च ॥ संपुटस्य विना देवि पुरश्चरणकर्मणा ॥ गुरुहस्तेन वा देवि साधकस्य करेण वा ॥ पुरश्चर्यां प्रकुर्वीत वर्णलक्षं जपावधिं ॥ न कदाचित्प्रकुर्वीत स्वगृहे न च साधकः ॥ न तिथिर्न च नक्षत्रं नागम्यास्य च मंत्रिणः ॥ न वारदोषो नो विघ्नो नाशौचं नियमो न च ॥ साक्षात् दग्धनरूपोयं मंत्रः कामेश्वरस्य च ॥ यंत्रोद्धारं तथा ध्यानं प्रयोगानष्ट वच्म्यहं ॥ ऋष्यादिकं प्रवक्ष्यामि शृणुत्वं वीरवंदिते ॥ ऋषिः स्याद्दक्षिणामूर्तिः पंक्तिश्छंद उदाहृतं ॥ देवता च मया प्रोक्ता महाकामेश्वरस्तथा ॥ लक्ष्मीबीजं पराशक्तिः कामराजस्तु कीलकं ॥ चतुर्वर्गेषु विद्यायां विनियोगः प्रकीर्तितः ॥ यंत्रोद्धारं प्रवक्ष्यामि सर्वाशापरिपूरकं ॥

का॰
प॰
२

सर्वसंमोहनं यंत्रं सर्वसिद्धिप्रदायकं ॥ अथ यंत्रोद्धारः ॥ बिंदुत्रिकोणवसुकोणदशारयुग्मं म
न्वस्रनागदलसंगतषोडशारं ॥ वृत्तत्रयं च धरणीसदनत्रयं च श्रीचक्रराजमुदितं परमे
श्वरस्य ॥ इति यंत्रोद्धारः ॥ अथ ध्यानं प्रवक्ष्यामि सर्वतंत्रेषु गोपितं ॥ सारं कामेश्वरस्यैव सर्वस्व
मम पार्वति ॥ येन ध्यानेन ब्रह्मांडकटाहांतं विलीयते ॥ उद्यन्मार्तंडकोटिद्युतिममृतकला
शेखरं श्यामकंठं ॥ मुक्ताभस्माहिरत्नैर्विलसितवपुषं श्रीक्षणं चापबाणान् ॥ बिभ्राणं पाशसृ
ङ्कैः सृणिमपि च करैः संयुतं देवदेव्या ॥ वामांके नौमि कामेश्वरममरपतिं विश्वमूर्तिममूर्तिम्
इति ध्यानं ॥ अनेन ध्यानमात्रेण ब्रह्मा विष्णुर्महेश्वरः शिवे ॥ ब्रह्मादयः सुरगणा जाता निस्पंदवक्षसः
कथयाम्यद्य देवेशि स्तंभनादिविधिं परं ॥ यं विधाय महेशानि साधको योगवान्भवेत् ॥ स्तंभनं
रविवारे तु स्नात्वा वाजस्नानमंत्रं शिवे ॥ यमुद्दिश्य भवेन्नूनं तस्य स्तंभनं त्वरितं कलौ ॥ तारं रमा परा तारं
हूं टत्रयमुदीरयेत् ॥ तारं परा रमा तारं फट् स्तंभनकरो ह्ययं ॥ गतेः सूर्यस्य चंद्रस्य जलवा।

नादिपाथसां॥रिपुसैन्यादिदस्तूनांस्तंभनंजायतेध्रुवं॥इतिस्तंभनं॥रवौस्नात्वानदीतीरे
जपेन्मूलंमहेश्वरि॥यस्योच्चारणमात्रेणमोहमेष्यतिभैरव:॥तारंकाम:शरस्तारंकूटत्रय
मत:परं॥शरस्कामंपुनस्तारंफट्मोहनमन्त्र:स्मृत:॥देवानांचनरेशानांस्त्रीणामप्सरसां
तथा॥सद्योदर्शनमात्रेणमोहनंजायतेध्रुवं॥इतिमोहनं॥रवौश्मशानेमंत्रस्यजपंकृत्वामहे
श्वरि॥आनीयभस्ममुष्टिंचक्षिपेच्छत्रुगृहेपथि॥सप्ताहान्म्रियतेशत्रु:साधकस्यनसंशय:॥
तारंकालींचकूर्चंचत्रिकूटपदमुच्चरेत्॥कूर्चंकालींतथातारंफट्मारणमन्त्र:स्मृत:॥नृपो
वान्यपशुस्तोवाविप्रोवाक्षत्रियोपिवा॥शत्रु:कालसमानोपिमृत्युमेष्यतिभैरवि॥इतिमारणं
रवौमंत्रंजपेत्प्रात:कामीसाधकसत्तम:॥रंभाद्यप्सरसांदेविभवेदाकर्षणंतत:॥तारंमारं
वाग्भवंचकूटत्रयमुदीरयेत्॥चंद्रंमारंतथातारंफडाकृष्टिमन्त्र:स्मृत:॥अस्योच्चारणमा
त्रेणसकृदाकर्षणंभवेत्॥रंभास्वर्गस्थितावापिप्रात:प्रादुर्भविष्यति॥इत्याकर्षणम्॥

का॰
प॰
३
3

रवौ मध्याह्नसमये स्नात्वा मूलं जपेच्छिवे ॥ जप्त्वा शीघ्रं वशं याति त्रैलोक्यं सचराचरं ॥ तारं परां
स्मरं तारं कूटत्रयमहेश्वरि ॥ तारं स्मरं परां तारं फट् वशीकारको मन्त्रः ॥ अस्योच्चारणमात्रे
णा देवा अपि महेश्वरि ॥ सद्यः किंकरतां यान्ति किं पुनः क्षुद्रभूमिपाः ॥ इति वशीकरणम् ॥
रवौ गत्वा श्मशाने च जपेन्मूलं महेश्वरि ॥ यज्जपेन भवेत्क्षुद्रो ह्युच्चाटनमरिंदमं ॥ तारं लज्जां शर
कामः कूटत्रितयमुच्चरेत् ॥ कामः शक्तिस्तनं तारं फट् उच्चाटनको मन्त्रः ॥ दशवारं प्रजप्तेन
मन्त्रेण परमेश्वरि ॥ रिपुमुच्चाटयेद्देवि सार्वभौममपि प्रिये ॥ इत्युच्चाटनं ॥ रवौ जपेन्मन्त्रं देवि
दशवारं यथाविधिः ॥ त्रिवारं सर्वरोगाणां सद्यः शान्तिर्भविष्यति ॥ तारं शारत्परा कामः कूट
त्रयमुच्चरेत् ॥ कामः शारत्परा तारं फट् शान्तिककरो ह्ययं ॥ रोगानामतिदुष्टानां ग्रहाणां ।
सर्वं दिते ॥ उपद्रवस्य सर्वस्य सद्यः शान्तिर्भविष्यति ॥ इति शान्तिकं ॥ रवौ स्नात्वा जपेन्मूलं दश
वारं महेश्वरि ॥ पिपासाकितदिग्भावे महावृष्टिः प्रजायते ॥ तारं मां रस्मरस्तारं कूटत्रयमहे ।

श्वरि ॥ तारं स्मरो मार तारो फट् पौष्टिककरोस्त्ययं ॥ दुर्वलानां नराणां च पितॄणां च दिवौ
कसां ॥ सकृदुच्चारमात्रेण महापुष्टिः प्रजायते ॥ इति पौष्टिकं ॥ रवौ जपेन्मंत्रं देवि स्नाय ।
कोदेवतार्चने ॥ येन जप्तेन वंध्याया भवेत्पुत्रोन्वयेश्वरः ॥ तारं शारत् शारत् तारं हृत्रितयमु
च्चरेत् ॥ तारं शारत् शारत् तारं फट् च सांतानिको मनुः ॥ वंध्याया काकवंध्यायाः मृतपुत्राः स्र
वेश्वरि ॥ पुत्रा भवंति श्रीमीशाः स्वकुलैकप्रदीपकाः ॥ इति सांतानिकं ॥ रवौ प्रातर्जपेन्मूलं तत्
त्वरूपं महेश्वरि ॥ यस्योच्चारणमात्रेण मौक्तिकं जायते ध्रुवं ॥ तारं र मार मा तारं हृत्त्रयमु
दीरयेत् ॥ तारं र मार मा तारं फट् मौक्तिककरोस्त्ययं ॥ इति मौक्तिकं ॥ इदं हि मम सर्वस्वं रहस्यं
त्रिदिवौकसां ॥ गोप्यं गुह्यतमं देहि न प्रकाश्यं कदाचन ॥ इति दशप्रयोगः ॥ अथ पुनर्देवि व
स्यामि पूजापटलमीश्वरि ॥ देवस्य परमेशस्य पूजां मानसिकीं चरेत् ॥ स्तनके मस्तके वापि प
थिकां तारमंडले ॥ स्नेहं च श्रीमौघका रायांसंकटे रणमंडले ॥ मनसैव चरेत्पूजां त्रिकूटस्य महे

का० प० ४

श्वरि।स्पृष्ट्वैवंतंभक्तिभावेनयथावद्वर्णितेनमया॥उत्थायशयनाद्देविब्राह्मेदिव्यमुहूर्तके
प्रक्षाल्यमुखहस्तांघ्रीनाचमेत्त्रिर्महेश्वरि।प्राणायामत्रयंकृत्वागुरुंध्यात्वासशक्तिकं॥दे
वंकामेश्वरंचैवपरमेशंसनातनं॥ध्यात्वापूर्वेणषड्दीर्घैर्न्यासंकृत्वायथाविधि।जपेन्मूलं
चगायत्रीगुरवेतत्समर्पयेत्।आगम्यवहिर्देशेोंकारंजपन्नारण्यभूमिषु॥तत्रमूत्रादिकंत्यक्त्व
वर्णीकंशौचमाचरेत्।कामवीजेनसंशोध्यदंतान्साधकसत्तमः॥मायावीजेनगंडूषत्रयंकु
र्यान्महेश्वरि।मूलेनदेवितीर्थानितदावाह्यस्वसिद्धये।गंगेचयमुनेचैवगोदावरिसरस्व
ति।नर्मदेसिंधुकावेरिजलेस्मिन्सन्निधिंकुरु॥इमावाह्यमहादेविदेवमावाहयेत्ततः॥मू
लेनत्रिःसमुत्सृज्यनद्यंभसिमहेश्वरि।ततोमूलंजपेन्मंत्रीगायत्रींचविशेषतः।सूर्याया
र्घ्यत्रयंदद्याद्देवदेवायतत्रैवच॥प्रथमंकूटमुच्चार्यपरमेश्वरायविद्महे॥द्वितीयकूटंत
तोदद्यात्कामेश्वरायधीमहि।तृतीयकूटंचोच्चार्यतन्नःकामेश्वरःप्रचोदयात्॥जलादा।

५

हृद्यावासं तास्मि परित्यज्य च साधकः॥ संध्यास्तु मनसा कृत्वाघमर्षणपूर्वकं॥ संध्यानि
वर्त्य देवेशि यागगेहं ततो व्रजेत्॥ ततो द्वारार्चनं कृत्वा ऊर्ध्वादासनशोधनं॥ भूतशुद्धिं ततः
कृत्वा प्राणार्पणं विधिं ततः॥ न्यासम्भागेन देहं च देवि शिवमयं चरेत्॥ मनसा वर्णभावोक्तं श्री
चक्रं तत्र भावयेत्॥ विभाव्य तत्र श्रीचक्रं हृदये साधको नमः॥ योगपीठं ततोभ्यर्च्य शिवस्य पर
मात्मनः॥ बिंदौ कामेश्वरं देवं परमेशं सनातनं॥ पात्राणि स्थापयेत्तत्र त्रिकोणे जलनिर्मिते
चतुरस्रं मंडलं च विधाय गंधवारिभिः॥ सामान्यार्घ्यं च देवस्य मंडले पूजयेच्छिवे॥ चतुर
स्रमंडलं च समभ्यर्च्य चरेत्ततः॥ ओं अस्त्राय फडिति वै संस्थाप्यात्र त्रिपादिकां॥ तत्रास्त्रतालि
तं शंखं समभ्यर्च्य तथास्त्रयोः॥ तत्रार्कमंडलं देवि सोमवह्न्योश्च मंडले॥ सम्पूज्य मूलमंत्रेण क
लास्तेषां समर्चयेत्॥ मूलाष्टमंत्रितं देवि विधाय तीर्थवारि च॥ तेनार्घ्ये पिवेशं शंखं शंखमु
द्रां निवेद्य च॥ तीर्थमावाह्य देवेशि देवं तत्रैव भावयेत्॥ सामान्यार्घ्यस्य वामे तु शोभितं कल

का॰
प॰
५

5

शंशिवे। यश्चैव षडंश्च वह्निंतत्त्रयोश्च मंडलं। पुष्पाद्यैः सममभ्यर्च्य तत्त्रकूटत्रयेण च। षडं
गन्यासभागेन सममभ्यर्च्य षडश्रकं। चतुरश्रं तथाभ्यर्च्य संस्थाप्य त्रिपादिकां। कलासूर्येंदु
वह्नीनां सममभ्यर्च्य यथाविधिः। कलशेस्मिन्महादेवि देवं संपूजयेच्छिवं। आनंदभैरवं चै
व देविकूटत्रयेण च। मायारमाकामबीजैर्धेनुमुद्रां प्रदर्शयेत्। मत्स्यमुद्रादिनाच्छाद्य सा।
मान्यार्घ्यस्य दक्षिणे। कलशस्थापनं कुर्यात् सामान्यार्घ्यं महेश्वरि। शांतिपात्रं समादाय मूले
नाष्टाभिमंत्रितं। तत्रैव प्रोक्षणीपात्रं तथा वटुकपात्रकं। गुरुपात्रादि संस्थाप्य तीर्थं शंखोदयो
प्यथः। पंक्त्याकारेण देवेशि पात्राणि स्थापयेत्ततः। पाद्यार्घ्यमधुपर्कं चाचमनीयं पात्रपूजनं।
विधाय देवदेवस्य न्यासं षडंगपूर्वकं। मणिपूरे व्रह्मरंध्रे मूलाधारादिकं शिवे। शिवस्य साम
रस्यं च विभाव्य साधकेश्वरः। ततः कामकलारूपईश्वरीकृतविग्रहः। शिवस्य च पादुकां च तर्प
यामि नमः इति। समयादेवि संतर्प्य ततः कूटत्रयेण च। सर्वज्ञता स्वच्छमायाः पूजनीयाश्च तत्।

पेणैः ॥ प्राणायामत्रयं कृत्वा मूलदेवं च तर्पयेत् ॥ परिवारांस्ततोभ्यर्च्य प्राप्तानामादौ च प्रार्थ
येत् ॥ कामेश्वर महादेव भक्तानुग्रहकारक ॥ अनुज्ञां देहि मे शीघ्रं परिवारार्चनाय मे ॥ विदो
कामेश्वरं देवं परिवारांस्ततोर्चयेत् ॥ विधिं वक्ष्यामि देवेश समासान्नयाव संयुतं ॥ चतुरस्रत्रये
सम्यक् दिक्ष्वीशाद्यादीन्न च पूजयेत् ॥ पुष्पैस्तर्पयेद्गन्धा विशेषार्घ्यस्य विंदुभिः ॥ इंद्रादीन् लोक
पालांश्च सायुधांदींस्तर्पयेत् ॥ ततो मूलेन देवेशं संतर्प्य च यथाक्रमं ॥ प्रथमावरणे ह्येतत्त्रै
लोक्यमोहनाभिधं ॥ द्वितीयावरणं वक्ष्ये सर्वाशापूरकाभिधं ॥ बीजत्रयं च देवेशि वाला याश्च
मनोहरं ॥ स्वरैः षोडशसंयुक्तं कामाकर्षणकं ततः ॥ एवं बुद्ध्याकर्षणं वा अहंकाराकर्षणं तथा ॥ सं
तर्पयेद्धूंस्त्रद्दिक्ष्वीशाद्यादीन्महेश्वरि ॥ परांशक्तियुताः सर्वाः सौर्ध्याः सन्तामहेश्वरि ॥ ततस्त्र
येणावाचयच्छिवप्रवमेवत्स्वयं ॥ श्रीचक्रे चैव देवस्य रूपं ध्यात्वा त्रिवर्णकं ॥ स्थापने सन्निधाने च
संमुखीकरणे शिवे ॥ मुद्राभिः साधकः कृत्वा देवीं स्पृष्ट्वा दिशुद्ध्या ॥ देवाय मूलेनैव च प्राणा

न्दत्वा महेश्वरि॥ शिवशक्त्योः परं रूपं ध्यात्वा पूजां समाचरेत्॥ तत्रादौ देवस्य शिवे पाद्यार्घ्यादी॥
न्निवेदयेत्॥ मधुपर्कं निवेद्याथ निवेद्याचमनीयकं॥ नानालंकारवस्त्राणि निवेद्य सायकोत्त
मः॥ नैवेद्याचमनीयादि शिवस्य च निवेदयेत्॥ धूपदीपादि संभाव्य परमान्नं निवेद्य च॥ तां
बूलं च मुखे दत्वा ताः स्वच्छत्वाद्यास्तर्पयेत्॥ पुष्पांजलिं च श्रीचक्रे दत्वा पूजां समाचरेत्॥ श्र
द्धाकर्षिणिकं चैव स्पर्शाकर्षिणिकं तथा॥ रूपाकर्षिणिकं तद्वद्रसाकर्षिणि मध्यग॥ गंधाकर्षि
णिकं चित्ताकर्षिणीं सर्वसिद्धिदं॥ धैर्याकर्षिणिकं स्मृत्याकर्षिणीं सुरवंदिते॥ नामाकर्षिणिकं
बीजाकर्षिणीं वीरवंदिते॥ आत्माकर्षिणिकं चैवामृताकर्षिणिकं तथा॥ शरीराकर्षिणिं देवि सं
तर्प्य च यथाक्रमं॥ पुनर्मूलेन देवेशं संपूज्य च विधानतः॥ वाग्भवं बीजमुच्चार्य योनिमुद्रां प्र
दर्शयेत्॥ प्रणमेच्च ततो भक्त्या देवं कामेश्वरं प्रिये॥ सर्वाशापूरकं चक्रं कथितं भक्तवत्सले
सर्वसंक्षोभकं चक्रं वक्ष्यामि चक्रनायिके॥ आदौ बीजत्रयं दद्यात्कवर्गं च ततो वदेत्॥ अस्मितांगं

भैरवं च समभ्यर्च्य यथाक्रमं ॥ एवं चवर्गं देवेशि रुरुभैरवमीश्वरि ॥ टवर्गं परमेशानि चंडभै
रवमर्चयेत् ॥ तवर्गं च ततो देवि क्रोधभैरवमुत्तमं ॥ पवर्गं विश्वजननि भैरवोन्मत्तसंज्ञकं ॥ यव
र्गं देवदेवेशि कपालेश्वरभैरवं ॥ शवर्गं च ततो दद्याद्भीषणाख्यं च भैरवं ॥ लक्षः बीजं हृदये देवि सं
हारभैरवं तथा ॥ एते ह्यष्टौ भैरवा देवि ग्रहपीठे प्रपूजयेत् ॥ तर्पयेच्च ततो भक्त्या योनिमुद्रां प्रद
र्शयेत् ॥ पुष्पैः संपूजयेद्भक्त्या प्रणमेच्च मुहुर्मुहुः ॥ सर्वसौभाग्यदं चक्रं वक्ष्यामि स्मरं वदिते
पुष्पैः संपूजयेद्भक्त्या मूलेनैव महेश्वरि ॥ सर्वसिद्धिप्रदं देवि सर्वसंपत्प्रदायकं ॥ ऐं क्लीं सौः
क्ष सर्वसंक्षोभणं देवि श्रां सर्वविद्राविणं तथा ॥ ईं सर्वाकर्षणं देवि ईं सर्वाह्लादनं तथा ॥ ऊं सर्वा
संमोहनं देवि ऊं सर्वस्तंभनकारकं ॥ ऋं सर्वजृंभणं चैव ॠं सर्वं च वशंकरं ॥ लृं सर्वरंजनं देवि
लॄं सर्वोन्मादनं तथा ॥ एं सर्वार्थसाधनं देवि ऐं सर्वसंपत्प्रपूरणं ॥ ओं सर्वमंत्रमयं देवि औं स
र्वद्वंद्वक्षयंकरं ॥ चतुर्दशारे चक्रेत्र पूज्यं संच यथाक्रमं ॥ मूलेन मूलदेवं तु योनिमुद्रां प्र

का॰ प॰ १७

दर्शयेत् ॥ सर्वसौभाग्यदं चक्रं कथितं वरवर्णिनि ॥ सर्वार्थसाधकं चक्रं वक्ष्यामि सुरवंदिते
पुष्पैश्च पूजयेद्भक्त्या मूलेनैव महेश्वरि । सर्वसिद्धिप्रदं देव सर्वसंपत्प्रपूरणं ॥ सर्वप्रियंकरं
देवं सर्वमंगलकारकं ॥ सर्वकामप्रदं चैव सर्वदुःखविमोचनं ॥ सर्वमृत्युप्रशमनं सर्व।
विघ्ननिवारणं ॥ सर्वांगसुंदरं देवं सर्वसौभाग्यदायकं ॥ बहिर्दशारचक्रे तु संपूज्य च।
यथाक्रमं ॥ मूलेन मूलदेवं तु योनिमुद्रां प्रदर्शयेत् ॥ सर्वरक्षाकरं चक्रं शृणु मत्प्राणव
ल्लभे ॥ सर्वज्ञं देवं देवेशि सर्वशक्तिमयं ततः ॥ सर्वैश्वर्यप्रदं देवं सर्वज्ञानमयं तथा ॥ सर्व
व्याधिप्रशमनं सर्वाधारस्वरूपकं ॥ सर्वपापहरं देवं सर्वानंदमयं ततः ॥ सर्वरक्षास्वरूपं
च सर्वेप्सितफलप्रदं ॥ बहिर्दशारचक्रे तु पूजनीया यथाक्रमं ॥ मूलेन मूलदेवं तु योनि
मुद्रां प्रदर्शयेत् ॥ एतच्चक्रत्रयं देवि सूर्यरूपं विचिंतयेत् ॥ वष्टावरणकं ह्येतन्मरणमेवं
व भक्तितः ॥ सर्वरोगहरं चक्रं वक्ष्यामि तव सुंदरि ॥ वशीकरणदेवं चकामेश्वरं तथैव च

मोदनविमलौ चैव सर्वेश्वरमतः परं॥ कौलितं भैरवं चैव पूजयेत्तर्पयेत्ततः॥ गंधाक्षत।
प्रसूनाद्यैर्मूलदेवं च तर्पयेत्॥ समास्निक्रमवामेन प्रणमेद्योनिमुद्रया॥ वाग्देवताष्टकं
पूजयेत्क्रमशस्तैर्विशेषतः॥ अंतरालस्थवक्राय दत्वा पुष्पांजलिं ततः॥ दत्ताधोर्हृत्कमले
देव्याः पश्चिमभागके॥ वरं चाभयदेवं च त्रिशूलं खड्गमेव च॥ चतुर्षु करपद्मेषु पूजयेदायुधा
नि तु॥ सर्वसिद्धिप्रदायात्र श्रीचक्राय महेश्वरि॥ दत्वा पुष्पांजलिं पूजामारभेत्साधकोत्तमः
आत्मेश्वरं च परमात्मेश्वरं ततः अनंतरं॥ अंतरात्मेश्वरं चैव पूजयेत्साधकोत्तमः॥ कूटत्रयेण दे
वेशि त्रिकोणे साधकोत्तमः॥ इति संपूज्य संतर्प्य मूलेन मूलदेवतां॥ सर्वानंदमयायात्र श्री
चक्राय सविंदेवि॥ दद्यात्पुष्पांजलिं देवि साधकः सर्वसिद्धये॥ मूलविद्यां समुच्चार्य सम्मवा
रं महेश्वरि॥ पूजयेत्साधको भक्त्या महाकामेश्वरं ततः॥ इति संपूज्य संतर्प्य गंधाक्षतप्रसू
नकैः॥ धूपदीपादिभिश्चैव नैवेद्यैश्च महत्तरैः॥ तथा श्रीवटुकायापि दद्याद्बलिमनुत्तमम्॥

का॰ प॰ ८ ४

दत्वा देवाय च पुनर्नैवेद्याचमनीयकं ॥ तांबूलछत्रचामरारात्रिकादीन्निवेदयेत् ॥ मुद्राः प्रद
र्शयेद्देवि साधकः परमेश्वरि ॥ देवाग्रे च जपं कृत्वा पाठं कुर्यात्ततः परं ॥ वर्मसहस्रनामाख्यं तत्स्तोत्र
राजस्य पार्वति ॥ शिवशक्त्योर्महादेवि जपं तत्र समर्पयेत् ॥ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृ
तं जपं ॥ सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वरि ॥ प्रातः प्रभृति सायान्तं सायादिप्रातरं यदि ॥ यत्क
रोमि जगद्देव तदस्तु तव पूजनं ॥ संहारमुद्रया देवि देवदेवौ विसृज्य च ॥ स्वयं सदाशिवो भूत्वा
शिवशक्तिस्वरूपकः ॥ त्रैलोक्यं साधको देवि सुखं च विहरेदिति ॥ प्रयोगांश्चैव वक्ष्येऽहं महेशोपर्वत
नंदिनि ॥ उपचारं ब्रवीम्यद्य न चाख्येयं दुरात्मने ॥ स्तंभनं मोहनं चैव मारणं कर्षणं तथा ॥ वशी
कारं तथोच्चाटं शांतिकं पौष्टिकं तथा ॥ एतेषां साधनं वक्ष्ये जगतां हितकाम्यया ॥ अभक्ताय न
दातव्यं न द्रष्टव्यं कदाचन ॥ सर्वाभ्यासाय शायनाकृत्वा प्रेतगृहांतिके ॥ मूलं साधकप्रवाज्ज
पेदयुतसंख्यया ॥ होमो जातीफलैः पीतैः पुष्पैश्च घृतमिश्रितैः ॥ शत्रुसैन्यादिदस्यूनां वादिनां

स्तंभनंभवेत् ॥ इतिस्तंभनं ॥ सोमेमध्याह्नसमयेस्नात्वाकूपजलेनतु ॥ कूपांतिकेमंत्रंजपेत्सासा।
यकोयुतसंख्यया ॥ होमयेत्घृतमिश्रंचमाहिषंदधिशर्करा ॥ भस्मनातिलकंकुर्यान्मोहयेद्भुव
नत्रयं ॥ इतिमोहनं ॥ भौमेर्धरात्रसमयेचतुष्पथगतःसुधीः ॥ अयुतंतुजपेन्मूलंहोमयेद्धुतपा
यसं ॥ रक्तचंदनमिश्रंचस्त्रीकेशैश्चसमन्वितं ॥ शत्रुःकालसमानोपिमृतमेष्यतिनान्यथा ॥ इति
मारणं ॥ बुधेनिशावसानेतुगत्वाश्मूमालयंजपेत् ॥ अयुतंमूलमंत्रंतुहोमयेद्घृतशर्करान् ॥ कर्णिका
रसहस्रंतुविल्वपुष्पाणिपार्वति ॥ रंभायक्षरसोवापिभवेदाकर्षणंध्रुवं ॥ इत्याकर्षणं ॥ गुरौसूर्यो।
दयेगत्वानदीतीरेचसाधकः ॥ मूलमंत्रंचदेवस्यजपेदयुतसंख्यया ॥ होमःसर्पिर्दधिक्षीरष्टष्ठी
कामालतीपुष्पैः ॥ श्रीफलैःसहस्रादेविवशयेद्भुवनत्रयं ॥ इतिवशीकरणं ॥ शुक्रेनिशामुखेग
त्वावटमूलेजपेन्मनुं ॥ अयुतंसाधकोभक्त्याहोमःकार्यस्तुसर्पिषा ॥ दध्याद्याज्ञाविमिश्रेणगोमू
त्रेणचपायसैः ॥ शत्रोर्मित्रस्यदेशस्यापिभवत्युच्चाटनंध्रुवं ॥ इत्युच्चाटनं ॥ शनौप्रभातसमयेकृत्वा

का. प. ५

कर्माह्निकं सुधीः ॥ आगमार्चनशय्यां तु जपेन्मंत्रमयुतं शिवे ॥ होमयेत्सर्पिरंभोजसहस्रा।
णि चतुर्दश ॥ ग्रहाणां देवकोपानां यक्षाणां रक्षसां तथा ॥ उपद्रवाणां सर्वेषां भयानां नृपतेस्त
था ॥ क्रूराणामतिदृष्टीनां महाशांतिः प्रजायते ॥ इति शांतिकं ॥ सर्ववारेषु सर्वत्र जपेन्मंत्रं सदा
युतं ॥ होमयेत्सर्पिरक्षोटमिश्रं चंदनमिश्रितं ॥ पायसं तक्रमिश्रं च मीनमांससमन्वितं ॥ देव
तानां मनुष्याणां रोगातीतां महेश्वरि ॥ ब्रह्मादीनां नृपादीनां महापुष्टिः प्रजायते ॥ इति पौष्टि।
कं ॥ इतीदं पटलं गोप्यं प्रथमांगं महेश्वरि ॥ मारं च परमेशस्य रक्षणीयं स्वगुह्यवत् ॥ ग्रमं गुह्यत।
मं गोप्यं गोपनीयं स्वयोनिवत् ॥ इति श्रीरुद्रयामले तंत्रे देवीभैरवसंवादे श्रीकामेश्वरपटलः
समाप्तः ॥ ॥ ॥

का॰
प॰
१

ॐ श्रीगणनाथाय नमः॥ ॐ श्रीगुरवे शिवाय नमः। श्रीभैरव उवाच॥ अधुना देवि वक्ष्या-
मि श्रीकामेश्वरपद्धतिं॥ गद्यपद्यमयीं गोप्यां सकलागमनिश्चितां॥ प्रातःकृत्यमकृत्वा तु यो
देवं भक्तितोऽर्चयेत्॥ तस्य पूजा तु विफला शौचहीना यथा क्रिया॥ तत्र श्रीमान् साधको ब्राह्मे मुहू-
र्ते शयनतलादुत्थाय॥ करचरणमुखानि प्रक्षाल्याचम्य॥ निजासने समुपविश्य॥ निजशिरसि
श्वेतवर्णः योऽसौ सहस्रदलकमलकर्णिकान्तर्गत॥ चन्द्रमण्डलसिंहासनोपरि निषण्णं स्वगु-
रुं शुक्लवर्णं शुक्लालंकारभूषितं॥ ज्ञानानन्दमुदितमानसं सच्चिदानन्दविग्रहं॥ त्रिनेत्रं चतुर्भु-
जं ज्ञानमुद्रापुस्तकवराभयकरं॥ वामाङ्गे वामहस्तधृत रक्तकमलया॥ रक्तवसनाभरणया
स्वप्रियया॥ दक्षिणभुजेनालिंगितं॥ सर्वदेवदेवं सर्वतीर्थतीर्थं॥ परमशिवस्वरूपं॥ शान्तं।
सुप्रसन्नं ध्यात्वा॥ तच्चरणकमलयुगलविगलदमृतधारया॥ स्वात्मानं प्लुतं विभाव्य॥ मानसो-
पचारैः पूजयेत्॥ लं गं धं श्रीगुरुपादुकायै समर्पयामि नमः॥ हं पुष्पं श्रीगुरुपादुकायै समर्-

र्पयामिनमः॥ यं धूपं श्रीगुरुपादुकायैसमर्पयामिनमः॥ रं दीपं श्रीगुरुपादुकायैसमर्पि।
यामिनमः॥ वं नैवेद्यं श्रीगुरुपादुकायैसमर्पयामिनमः॥ सं सर्वात्मक फलतांबूलादिकं श्री
गुरुपादुकायैसमर्पयामिनमः॥ ॐ ऐं ह्रीं श्रीं ह्सख्फ्रें ह्सक्षमलवरयूं सहख्फ्रें सहक्ष
मलवरयूं ह्सौः ह्सौः श्रीमच्छ्री स्वामिअमरनाथ कौलानंदनाथश्रीपादुकां श्रीदेवमालं
बाश्रीपादुकां पूजयामिनमः॥ इति दशधा विभाव्य॥ दंडवत्प्रणामं मनसा कुर्यात्॥ तत्र प्रणाम।
मंत्रा यथा सहस्रदलपंकजे सकलशीतरश्मिप्रभं॥ वराभयकरांबुजे विमलगंधपुष्पांबरं
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं॥ स्मरेच्छिरसि हंसगं तदभिधानपूर्वं गुरुम्॥ इतिध्या
नं ॐ नमामि सद्गुरुं शांतं प्रत्यक्षंशिवरूपिणं॥ शिरसा योगपीठस्थं मुक्तिकामार्थसिद्धये॥
श्रीगुरुं परमानंदं वंदाम्यानंदविग्रहं॥ यस्यसान्निध्यमात्रेण चिदानंदायते परं॥ २॥ नमोस्तु गु
रवे तस्मै॥ यिष्टदेवस्वरूपिणे॥ यस्य वागमृतं हंति विषं संसारसंज्ञकं॥ ३॥ अखंडमंडलाकारं

व्याप्तं येन चराचरं। तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥४॥ अज्ञानतिमिरान्धस्य ज्ञानांजनश
लाकया। चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥५॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः साक्षान्महेश्वर
गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः॥६॥ नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे। विद्यावतार
संसिद्ध्यै स्वीकृतानेकविग्रहः॥७॥ नवाय नवरूपाय परमार्थैकरूपिणे। सर्वज्ञानतमोभेदभान
वे चिद्घनाय ते॥८॥ स्वतंत्राय दयाक्लृप्तविग्रहाय परात्मने। परतंत्राय भक्तानां भव्यानां भव्यरूपिणे॥ ९
विवेकिनां विवेकाय विमर्शाय विमर्शिनां। प्रकाशिनां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे॥१०॥ पुर
स्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः। सदा सच्चित्तरूपेण विधेहि भवदासनं॥११॥ इत्येतैर्मंत्रैः श्री
गुरुं प्रणम्य। स्वप्रसन्नं विभाव्य। मनसा तदाज्ञां गृहीत्वा। मूलाधारे स्वर्णवर्णचतुर्दलकमलक
र्णिकांतर्गत शृंगाटकपीठांतर्गत। त्रिकोणपीठोपरि परां शक्तिं कुंडलिनीं सर्पाकारां। स्वयंभु
वीं सार्धत्रिवलयां। उद्यद्दिनकरसहस्रभां विद्युत्कोटिसन्निभां। बिसतंतुतनीयसीं पंचाशद्वर्ण

विग्रहा। मष्टाविंशत्कलारूपिणीं। त्रिधामधामानं। सर्वप्राणिजीवां। सर्वदेवाधिदेवीं। सकलमं
त्रमातरं सूक्ष्मां विभाव्य। गुरूपदिष्टमार्गेण निजसहजनादेन सचैतन्यां विधाय। तत्र। चतुर्दले
षु। ॐ ऐं ह्रीं श्रीं वं नमः। ॐ ऐं ह्रीं श्रीं शं नमः। ॐ ऐं ह्रीं श्रीं षं नमः। ॐ ऐं ह्रीं श्रीं सं नमः। इति पत्रेषु। मध्ये
मूलेन च प्रागदक्षिणेन संस्पृश्य। हंसः इति मंत्रेण कमलात्कमलांतरं नीत्वा। ततः स्वाधिष्ठाने लिंग
मूले विद्रुमवर्णे षड्दलकमले तां नीत्वा। तत्र। ॐ ऐं ह्रीं श्रीं वं नमः। ॐ ऐं ह्रीं श्रीं भं नमः। ॐ ऐं ह्रीं श्रीं मं
नमः। ॐ ऐं ह्रीं श्रीं यं नमः। ॐ ऐं ह्रीं श्रीं रं नमः। ॐ ऐं ह्रीं श्रीं लं नमः। इति पत्रेषु मध्ये मूलेन च संस्पृश्य। त
तो मणिपूरके नाभौ नीलवर्णे दशदलकमले तां नीत्वा। तत्र ॐ ऐं ह्रीं श्रीं डं नमः। ॐ ऐं ह्रीं श्रीं ढं नमः।
ॐ ऐं ह्रीं श्रीं णं नमः। ॐ ऐं ह्रीं श्रीं तं नमः। ॐ ऐं ह्रीं श्रीं थं नमः। ॐ ऐं ह्रीं श्रीं दं नमः। ॐ ऐं ह्रीं श्रीं धं नमः। ॐ
ऐं ह्रीं श्रीं नं नमः। ॐ ऐं ह्रीं श्रीं पं नमः। ॐ ऐं ह्रीं श्रीं फं नमः। इति पत्रेषु। मध्ये मूलेन च संस्पृश्य। ततो वक्षा
स्थनाहते पिंगलवर्णे द्वादशकमले तां नीत्वा तत्र। ॐ ऐं ह्रीं श्रीं कं नमः। ॐ ऐं ह्रीं श्रीं खं नमः। ॐ ऐं ह्रीं।

का० ह० १

3

श्री

श्रीं गं नमः ॥ ॐ ऐं ह्रीं श्रीं घं नमः ॥ ॐ ऐं ह्रीं श्रीं ङं नमः ॥ ॐ ऐं ह्रीं श्रीं चं नमः ॥ ॐ ऐं ह्रीं श्रीं छं नमः ॥ ॐ ऐं ह्रीं श्रीं जं
नमः ॥ ॐ ऐं ह्रीं श्रीं झं नमः ॥ ॐ ऐं ह्रीं श्रीं ञं नमः ॥ ॐ ऐं ह्रीं श्रीं टं नमः ॥ ॐ ऐं ह्रीं श्रीं ठं नमः ॥ इति पत्रेषु ॥ मध्ये
मूलेन च संपूज्य ॥ ततो विशुद्धौ कंठे स्वरवर्णे षोडशदलकमले तां नीत्वा ॥ तत्र ॥ ॐ ऐं ह्रीं श्रीं अं नमः
ॐ ऐं ह्रीं श्रीं आं नमः ॥ ॐ ऐं ह्रीं श्रीं इं नमः ॥ ॐ ऐं ह्रीं श्रीं ईं नमः ॥ ॐ ऐं ह्रीं श्रीं उं नमः ॥ ॐ ऐं ह्रीं श्रीं ऊं नमः ॥ ॐ ऐं ह्रीं
श्रीं ऋं नमः ॥ ॐ ऐं ह्रीं श्रीं ॠं नमः ॥ ॐ ऐं ह्रीं श्रीं ऌं नमः ॥ ॐ ऐं ह्रीं श्रीं ॡं नमः ॥ ॐ ऐं ह्रीं एं नमः ॥ ॐ ऐं ह्रीं श्रीं ऐं नमः
ॐ ऐं ह्रीं श्रीं ओं नमः ॥ ॐ ऐं ह्रीं श्रीं औं नमः ॥ ॐ ऐं ह्रीं श्रीं अं नमः ॥ ॐ ऐं ह्रीं श्रीं अः नमः ॥ इति पत्रेषु ॥ मध्ये मूले
न च संपूज्य ॥ ततो भ्रूमध्ये ॥ आज्ञाचक्रे विद्युद्वर्णे द्विदलकमले तां नीत्वा ॥ तत्र ॥ ॐ ऐं ह्रीं श्रीं हं नमः ॥
ॐ ऐं ह्रीं श्रीं क्षं नमः ॥ इति पत्रेषु ॥ मध्ये मूलेन च संपूज्य ॥ ततो ब्रह्मरंध्रगत सहस्रदलकमले तां
प्रापय्य ॥ तत्र विंदुरूपतेजोमयपरमशिवेन सहैकतां नीत्वा ॥ ततः स्रवत्परमामृतेन तां संतर्प्य ॥
तत्र नादश्रवणतन्मयो मुहूर्तं लयं विभाव्य ॥ ततो वरो हंसोऽहमिति मंत्रेण तां कुंडलिनीं ॥ आज्ञाचक्रे

विद्युद्वर्णे द्विदलकमले समानीय ॥ तत्र ॥ ॐ ऐं ह्रीं श्रीं हं नमः ॥ ॐ ऐं ह्रीं श्रीं क्षं नमः ॥ इति पत्रयोर्म
ध्ये मूलेन च संपूज्य ॥ ततो विशुद्धौ कण्ठे धूम्रवर्णे षोडशदलकमले तां समानीय ॥ तत्र ॥ ॐ ऐं ह्रीं श्रीं अं
नमः ॥ ॐ ऐं ह्रीं श्रीं आं नमः ॥ ॐ ऐं ह्रीं श्रीं इं नमः ॥ ॐ ऐं ह्रीं श्रीं ईं नमः ॥ ॐ ऐं ह्रीं श्रीं उं नमः ॥ ॐ ऐं ह्रीं श्रीं ऊं नमः ॥ ॐ
ऐं ह्रीं श्रीं ऋं नमः ॥ ॐ ऐं ह्रीं श्रीं ॠं नमः ॥ ॐ ऐं ह्रीं श्रीं ऌं नमः ॥ ॐ ऐं ह्रीं श्रीं ॡं नमः ॥ ॐ ऐं ह्रीं श्रीं एं नमः ॥ ॐ ऐं
ह्रीं श्रीं ऐं नमः ॥ ॐ ऐं ह्रीं श्रीं ओं नमः ॥ ॐ ऐं ह्रीं श्रीं औं नमः ॥ ॐ ऐं ह्रीं श्रीं अं नमः ॥ ॐ ऐं ह्रीं श्रीं अः नमः ॥ इति प
त्रेषु मध्ये मूलेन चाभ्यर्च्य ॥ ततो वक्षस्थाने हृते पिंगलवर्णे द्वादशकमले तां समानीय ॥ तत्र ॥ ॐ ऐं ह्रीं ।
श्रीं कं नमः ॥ ॐ ऐं ह्रीं श्रीं खं नमः ॥ ॐ ऐं ह्रीं श्रीं गं नमः ॥ ॐ ऐं ह्रीं श्रीं घं नमः ॥ ॐ ऐं ह्रीं श्रीं ङं नमः ॥ ॐ ऐं ह्रीं श्रीं
चं नमः ॥ ॐ ऐं ह्रीं श्रीं छं नमः ॥ ॐ ऐं ह्रीं श्रीं जं नमः ॥ ॐ ऐं ह्रीं श्रीं झं नमः ॥ ॐ ऐं ह्रीं श्रीं ञं नमः ॥ ॐ ऐं ह्रीं श्रीं टं नमः
ॐ ऐं ह्रीं श्रीं ठं नमः ॥ इति पत्रेषु ॥ मध्ये मूलेन चाभ्यर्च्य ॥ ततो मणिपूरे नाभौ नीलवर्णे दशदलकमले
तां समानीय ॥ तत्र ॥ ॐ ऐं ह्रीं श्रीं डं नमः ॥ ॐ ऐं ह्रीं श्रीं ढं नमः ॥ ॐ ऐं ह्रीं श्रीं णं नमः ॥ ॐ ऐं ह्रीं श्रीं तं नमः ॥ ॐ

ऐंह्रींश्रींथंनमः॥ॐऐंह्रींश्रींदंनमः॥ॐऐंह्रींश्रींधंनमः॥ॐऐंह्रींश्रींनंनमः॥ॐऐंह्रींश्रींपंनमः॥ॐऐंह्रीं
श्रींफंनमः॥इतिपत्रेषु॥मध्येमूलेनचसंपूज्य॥ततःस्वाधिष्ठानेलिंगमूलेविद्रुमवर्णेषट्दल
कमलेतांसमानीय॥तत्र॥ॐऐंह्रींश्रींवंनमः॥ॐऐंह्रींश्रींभंनमः॥ॐऐंह्रींश्रींमंनमः॥ॐऐंह्रींश्रींयं
नमः॥ॐऐंह्रींश्रींरंनमः॥ॐऐंह्रींश्रींलंनमः॥इतिपत्रेषु॥मध्येमूलेनचसंपूज्य॥ततोमूलाधारेस्वर्ण
वर्णेचतुर्दलकमलेतांसमानीय॥तत्र॥ॐऐंह्रींश्रींवंनमः॥ॐऐंह्रींश्रींशंनमः॥ॐऐंह्रींश्रींषंनमः॥ॐ
ऐंह्रींश्रींसंनमः॥इतिपत्रेष्वभ्यर्च्य॥मध्येमूलेनचतांसमर्पयेत्॥इत्यारोहावरोहक्रमेणपरांश
क्तिंकुंडलिनींध्यात्वा॥ॐप्रकाशमानांप्रथमेप्रयाणेप्रतिप्रयाणेप्यमृतायमानां॥अंतःपदव्या
मनुसंचरंतीमानंदरूपामवलांप्रपद्ये॥१॥अहंदेवीनचान्योस्मिब्रह्मैवाहंनशोकभाक्सच्चिदानं
दरूपोहमात्मानंचविचिंतयेत्॥२॥मानसोपचारैःसंपूज्य॥मूलेनप्राणायामत्रयंकुर्यात्॥ ॥
ॐअस्यश्रीगणपतिमंत्रस्य॥श्रीब्रह्माऋषिः॥गायत्रीछंदः॥श्रीमहागणपतिर्देवता॥गंबीजं॥

ह्रींशक्तिः॥नमःकीलकं॥ममनिर्विघ्नश्रीकामेश्वरकामेश्वर्यंगत्वेनजपेविनियोगः॥इतिकृतां
जलिःस्वन्यासेत्॥ब्रह्मऋषयेनमःशिरसि॥गायत्रीछंदसेनमोमुखे॥श्रीमहागणपतिर्देवता
येनमोहृदि॥गंबीजायनमोगुह्ये ह्रींशक्तयेनमःपादयोः॥नमःकीलकायनमोनाभौ॥ममनिर्वि
घ्नश्रीकामेश्वरकामेश्वर्यंगत्वेनजपेविनियोगःसर्वांगेषु॥इतिऋष्यादिन्यासः॥अथकरन्यासः॥
गांअंगुष्ठाभ्यांनमः॥गींतर्जनीभ्यांस्वाहा॥गूंमध्यमाभ्यांवषट्॥गैंअनामिकाभ्यांहुं॥गौंकनिष्ठिका
भ्यांवौषट्॥गःकरतलकरपृष्ठाभ्यांफट्॥इतिकरन्यासः॥अथषडंगन्यासः॥गांहृदयायनमः॥गीं
शिरसेस्वाहा॥गूंशिखायैवषट्॥गैंकवचायहुं गौंनेत्रत्रयायवौषट्॥गःअस्त्रायफट्॥इतिषडंग
न्यासः॥अथध्यानं॥ॐगजवदनमचिंत्यंतीक्ष्णदंतंत्रिनेत्रं॥बृहदुदरमनंतंदंतमालेदधानं॥पर
शुवषकपद्मंदधद्धस्तारविंदं॥हरियुगलनिविष्टंश्रीगणेशंभजामि॥इतिध्यानं॥अथगायत्री॥
गंतत्पुरुषायविद्महे॥वक्रतुंडायधीमहि॥तन्नोदंतीप्रचोदयात्॥इमानसोपचारैःसंपूज्ययथा

का॰
गु॰
५

लं पृथिव्यात्मकं गंधं समर्पयामि नमः॥ हं आकाशात्मकं पुष्पं समर्पयामि नमः॥ यं वाय्वात्मकं धूपं समर्पयामि नमः॥ रं वह्न्यात्मकं दीपं समर्पयामि नमः॥ वं अमृतात्मकं नानानैवेद्यं समर्पयामि नमः॥ सं सर्वात्मकं फलमूलतांबूलादिकं समर्पयामि नमः॥ इति मानसोपचारैः संपूज्य॥ ततो मूलमंत्रेण यथाशक्ति जपं कुर्यात्॥ ह्रीं गं ह्रीं गणपतये नमः॥ इति मूलमंत्रः॥ जपांते मालां शिरसि संस्थाप्य॥ सर्ववत्माणायामत्यादिकरषडंगन्यासान्विधाय॥ ॐ त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव॥ शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा॥ मालां शिरसि उन्नार्य रहः संस्थाप्य॥ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं॥ सिद्धिर्भवतु मे देव त्वत्प्रसादाद्विनायक॥ अनेन मंत्रजप्येन श्रीगणपतिदेवताप्रीयतां प्रीतो नोऽस्तु॥ ॥ ॐ अस्य श्रीवटुकभैरवमंत्रस्य॥ ईश्वर ऋषिः॥ गायत्री छंदः॥ श्रीवटुको देवता॥ ह्रीं बीजं॥ वटुक शक्तिः॥ ॐ रुरु ॐ रु कीलकं॥ जपे विनियोगः॥ इति कृतांजलिः स्मृत्वा न्यसेत्॥ ईश्वर ऋषये नमः शिरसि॥ गायत्रीछंदसे नमो मुखे॥ श्रीवटुकदेवतायै नमो हृदि॥ ह्रीं बीजाय नमो नाभौ॥ वटु

कायशक्तयेनमः पादयोः॥ ऊरुऊरुकीलकायनमो गुह्ये॥ जपेविनियोगः सर्वांगेषु॥ इतिऋ
ष्यादिन्यासः॥ अथकरन्यासः॥ ॐ ह्रांवांअंगुष्ठाभ्यांनमः॥ ॐ ह्रींवींतर्जनीभ्यांस्वाहा॥ ॐ ह्रूंवूंमध्य
माभ्यांवषट्॥ ॐ ह्रैंवैंअनामिकाभ्यांहुं॥ ॐ ह्रौंवौंकनिष्ठिकाभ्यांवौषट्॥ ॐ ह्रःवःकरतलकरपृष्ठाभ्यां
फट्॥ इतिकरन्यासः॥ अथषडंगन्यासः॥ ॐ ह्रांवांहृदयायनमः॥ ॐ ह्रींवींशिरसेस्वाहा॥ ॐ ह्रूंवूंशिखा
यैवषट्॥ ॐ ह्रैंवैंकवचायहुं॥ ॐ ह्रौंवौंनेत्राभ्यांवौषट्॥ ॐ ह्रःवःअस्त्रायफट्॥ इतिषडंगः॥ अथगायत्री॥
ॐ ह्रींवटुकायविद्महे॥ आपदुद्धारणायधीमहि॥ तन्नोवटुकः प्रचोदयात्॥ ३॥ अथध्यानं॥ ॐ करक
लितकपालः कुंडलीदंडपाणिस्तरुणतिमिरनीलोव्यालयज्ञोपवीती॥ क्रतुसमयसपर्याविघ्न।
विच्छेदहेतुर्जयतिवटुकनाथः सिद्धिदः साधकानां॥ अथमंत्रः॥ ॐ ह्रींवटुकायआपदुद्धारणायकुरु
कुरुवटुकायह्रींस्वाहा॥ इतिमंत्रः॥ मानसोपचारैः संपूज्य॥ लंपृथिव्यात्मकंगंधंसमर्पयामिनमः॥
हंआकाशात्मकंपुष्पंसमर्पयामिनमः॥ यंवाय्वात्मकंधूपंसमर्पयामिनमः॥ रंवह्न्यात्मकंदीपंस।

का॰
पू॰
६

र्पयामिनमः॥ वं ग्रमृतात्मकं नानानैवेद्यं समर्पयामिनमः॥ सं सर्वात्मकं फलमूलतांबूलादिकं स
मर्पयामिनमः॥ इतिमानसोपचारैः पूजा॥ जपंकुर्यात्॥ पूर्ववत्प्राणायाम ऋष्यादिकरषडंगन्यासान्
विधाय॥ ॐ त्वंमाले सर्वदेवानां प्रीतिदा शुभदा भव॥ शुभं कुरुष्व मे भद्रे यशोवीर्यं च सर्वदा॥ मालांशिर
सि उत्तार्य॥ रहः संस्थाप्य॥ गुह्याति॰॥ अनेन मंत्रजपेन श्रीवटुकभैरवदेवता प्रीयतां न तत्प्रीतोऽस्तु॥ ॥
ॐ अस्य श्रीबालात्रिपुरामंत्रस्य॥ दक्षिणामूर्तिऋषिः॥ पंक्तिछंदः॥ श्रीबालादेवता॥ ऐं बीजं॥ क्लीं शक्तिः
सौंः कीलकं॥ जपे विनियोगः॥ इतिकृतांजलिः स्तत्न्यसेत्॥ दक्षिणामूर्तिऋषये नमः शिरसि॥ पं
क्तिछंदसे नमो मुखे॥ श्रीबालादेवतायै नमः हृदि॥ ऐं बीजाय नमो गुह्ये॥ क्लीं शक्तये नमो पादयोः॥
सौंः कीलकाय नमो नाभौ॥ जपे विनियोगः सर्वांगेषु॥ इति ऋष्यादिन्यासः॥ अथ करन्यासः॥ ऐं अंगुष्ठा
भ्यां नमः॥ क्लीं तर्जनीभ्यां स्वाहा॥ सौंः मध्यमाभ्यां वषट्॥ ऐं अनामिकाभ्यां हुं॥ क्लीं कनिष्ठिकाभ्यां वौषट्॥
सौंः करतलकरपृष्ठाभ्यां फट्॥ इतिकरन्यासः॥ अथ षडंगन्यासः॥ ऐं हृदयाय नमः॥ क्लीं शिरसे स्वाहा॥

6

सौंः शिखायै वषट्॥ ऐं कवचाय हुं॥ क्लीं नेत्राभ्यां वौषट्॥ सौंः अस्त्राय फट्॥ इति षडंगन्यासः॥ अ
थ गायत्री॥ ऐं बालादेवि विद्महे॥ क्लीं कामेश्वरि धीमहि॥ तन्नो शक्तिः प्रचोदयात्॥ ॥ इति गायत्री
अथ ध्यानं॥ ॐ अरुणकिरणजालैरंजिताशावकाशा विधृतजपवटीका पुस्तकाभीतिहस्ता॥
इतरकरवराढ्या फुल्लकल्हारसंस्था निवसतु हृदि बाला नित्यकल्याणशीला॥ इति ध्यानं॥ अथ।
मूलमंत्रः॥ ॐ ऐं क्लीं सौंः बालायै नमः॥ इति मूलमंत्रः॥ मानसोपचारैः संपूज्य॥ लं पृथिव्यात्मकं
गंधं समर्पयामि नमः॥ हं आकाशात्मकं पुष्पं समर्पयामि नमः॥ यं वाय्वात्मकं धूपं समर्पयामि
नमः॥ रं वह्न्यात्मकं दीपं समर्पयामि नमः॥ वं अमृतात्मकं नानानैवेद्यं समर्पयामि नमः॥ सं सर्वा
त्मकं फलमूलतांबूलादिकं समर्पयामि नमः॥ इति मानसोपचारैः संपूज्य॥ जपं कुर्यात्॥ एवं व
प्राणायामऋष्यादिकरषडंगन्यासान्विधाय॥ ॐ त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव॥ शुभं
कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा॥ मालामिरमितिउतार्थ॥ रहः संस्थाप्य॥ गुह्यातिगुह्यगोप्ता त्वं।

इत्यादि॥ अनेन मंत्रजप्येन श्रीबालात्रिपुरसुंदरीदेवता प्रीयतांतप्रीतोस्तु ॥ ॥
ॐ अस्य श्रीकामेश्वरमंत्रस्य॥ दक्षिणामूर्तिऋषिः॥ पंक्तिश्छंदः॥ श्रीकामेश्वरो देवता॥ श्रीं बीजं॥ ह्रीं श
क्तिः॥ क्लीं कीलकं॥ मम भोगापवर्गसिद्धये जपे विनियोगः॥ इति कृतांजलिः स्मृत्वा न्यसेत्॥ दक्षिणा
मूर्तिऋषये नमः शिरसि॥ पंक्तिश्छंदसे नमो मुखे॥ श्रीकामेश्वरदेवतायै नमो हृदि॥ श्रीं बीजाय नमो
गुह्ये॥ ह्रीं शक्तये नमो पादयोः॥ क्लीं कीलकाय नमो नाभौ॥ मम भोगापवर्गसिद्धये जपे विनियोगः॥
सर्वांगेषु॥ इति ऋष्यादिन्यासः॥ अथ करन्यासः॥ श्रीं अंगुष्ठाभ्यां नमः॥ ह्रीं तर्जनीभ्यां स्वाहा॥ क्लीं म
ध्यमाभ्यां वषट्॥ श्रीं अनामिकाभ्यां हुं॥ ह्रीं कनिष्ठिकाभ्यां वौषट्॥ क्लीं करतलकरपृष्ठाभ्यां फट्
इति करन्यासः॥ अथ षडंगः॥ श्रीं हृदयाय नमः॥ ह्रीं शिरसे स्वाहा क्लीं शिखायै वषट्॥ श्रीं कवचा
य हुं॥ ह्रीं नेत्रत्रयाय वौषट्॥ क्लीं अस्त्राय फट्॥ इति षडंगन्यासः॥ अथ गायत्री॥ ॐ कामेश्वराय
विद्महे॥ शक्तीश्वराय धीमहि॥ तन्नः आत्मा प्रचोदयात्॥ १॥ इति गायत्री ॥ ॥

अथ ध्यानं॥ ॐ सूर्यकोटिसमानाभं चंद्रमौलिं त्रिलोचनं॥ वराभयत्रिशूलासिकरं कामेश्वरं भ
जे॥ इति ध्यानं॥ अथ मंत्रः॥ ऐं श्रीं ह्रीं क्लीं कामेश्वराय नमः॥ इति मंत्रः॥ मानसोपचारैः संपूज्य॥ लं
पृथिव्यात्मकं गंधं श्रीकामेश्वरपादुकायै समर्पयामि नमः॥ हं आकाशात्मकं पुष्पं श्रीकामेश्व
रपादुकायै समर्पयामि नमः॥ यं वाय्वात्मकं धूपं श्रीकामेश्वरपादुकायै समर्पयामि नमः॥ रं वा
ह्न्यात्मकं दीपं श्रीकामेश्वरपादुकायै समर्पयामि नमः॥ वं अमृतात्मकं नानानैवेद्यं श्रीकामेश्व
रपादुकायै समर्पयामि नमः॥ सं सर्वात्मकं फलमूलतांबूलादिकं श्रीकामेश्वरपादुकायै॥
समर्पयामि नमः॥ इति मानसोपचारैः संपूज्य॥ ह्रीं गं ह्रीं गणपतये नमः॥ १॥ ह्रीं वां वटुकाय नमः ‍१०
ऐं क्लीं सौंः श्रीत्रिपुरायै नमः॥ १॥ मालामादाय॥ ह्रीं सिद्ध्यै नमः इति मनसा संपूज्य॥ दक्षहस्तेन
ऐं श्रीं ह्रीं क्लीं कामेश्वराय ह्सौंः सौंः शिवाय नमः॥ इति मूलमंत्रं यथाशक्ति जपित्वा॥ जपांते मा
लां शिरसि संस्थाप्य॥ एवं वक्ष्यमाणयामनष्टाद्यादिकरषडंगन्यासध्यानांतं कृत्वा॥ मालां रहः सं।

का॰
पू॰
८

8

स्यापय॥ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर॥ इति
जपं श्रीकामेश्वरदक्षहस्ते समर्पितं विभाव्य प्रणमेत्॥ ततः॥ ॐ ऐं ह्रीं श्रीं अद्य पूर्वेद्युरहोरात्रा
चरितमुच्छ्वासनिःश्वासात्मकं षट्शताधिकमेकविंशतिसहस्रसंख्याकमजपाजपं समर्प।
यामि नमः॥ ॐ ऐं ह्रीं श्रीं मूलाधारचक्रस्थाय गणपतये अजपाजपानां षट्शतानि समर्पयामि।
नमः॥ ६०० ॥ ॐ ऐं ह्रीं श्रीं स्वाधिष्ठानचक्रस्थाय ब्रह्मणे अजपाजपानां षट्सहस्राणि समर्पयामि नमः
६००० ॥ ॐ ऐं ह्रीं श्रीं मणिपूरकचक्रस्थाय विष्णवे अजपाजपानां षट्सहस्राणि समर्पयामि नमः॥ ६०००
ॐ ऐं ह्रीं श्रीं अनाहतचक्रस्थाय रुद्राय अजपाजपानां षट्सहस्राणि समर्पयामि नमः॥ ६००० ॥ ॐ
ऐं ह्रीं श्रीं विशुद्धचक्रस्थाय जीवात्मने अजपाजपानां सहस्रं समर्पयामि नमः॥ १००० ॥ ॐ ऐं ह्रीं श्रीं
आज्ञाचक्रस्थाय परमात्मने अजपाजपानां सहस्रं समर्पयामि नमः॥ १००० ॥ ॐ ऐं ह्रीं श्रीं सहस्रदल
कमलकर्णिकामध्यस्थायै श्रीगुरुपादुकायै अजपाजपानां सहस्रं समर्पयामि नमः॥ १००० ॥ इति

समर्पयेत्॥ एतावत्कर्तृमशक्तश्चेत्॥ ॐ ऐं ह्रीं श्रीं अद्य पूर्वेद्युरहोरात्राचरितमुच्छ्वासनिःश्वा
सात्मकं षट्शताधिकमेकविंशतिसहस्रसंख्याकमजपाजपं ब्रह्मरंध्रस्थसहस्रदलकम
लकर्णिकामध्यवर्तिने श्रीगुरुपादुकायै समर्पयामि नमः॥ इति गुरवे एवं समर्पयेत्॥ इमज
पाजपं समर्प्य॥ ॥ ॐ अद्य सूर्योदयमारभ्य अहोरात्रेणोच्छ्वासनिःश्वासात्मकं षट्शताधिक
मेकविंशतिसहस्रसंख्याकमजपाजपमहं करिष्ये॥ इति कृतांजलिः संकल्प्य॥ अजपामंत्रेण
प्राणायामं विधाय॥ संकल्पं कुर्याद्यथा॥ ॐ अस्य श्रीअजपागायत्रीमंत्रस्य॥ हंस ऋषिः॥ अव्यक्त
गायत्री छंदः॥ परमहंसो देवता॥ हं बीजं॥ सः शक्तिः॥ सोहं कीलकं॥ ॐकारस्तत्त्वं॥ नभः स्थानं हेमो
वर्णः॥ उदात्तः स्वरः॥ मम मोक्षार्थं जपे विनियोगः॥ इति कृतांजलिः स्मृत्वा न्यसेत्॥ हंस ऋषये।
नमः शिरसि॥ अव्यक्तगायत्रीछंदसे नमो मुखे॥ परमहंसदेवतायै नमः हृदि॥ हं बीजाय नमः॥
गुह्ये॥ सः शक्तये नमः पादयोः॥ सोहं कीलकाय नमः नाभौ॥ ॐकाराय तत्त्वाय नमः हृदये॥ नभ

का॰ सू॰ ४

सेष्यानायनमः मूर्भि॥ हेमायवर्णायनमः सर्वांगे॥ उदात्तायस्वरायनमः कंठे॥ इतिविन्यस्य॥

ममभोक्तार्थेजपेविनियोगः॥ इतिऋष्यादिन्यासः॥ अथकरन्यासः॥ ॐ ऐं ह्रीं श्रीं ह्रां सूर्यात्मने

स्वाहा अंगुष्ठाभ्यांनमः॥ ॐ ऐं ह्रीं श्रीं ह्रीं सोमात्मने स्वाहा शिरसे स्वाहा॥ ॐ ऐं ह्रीं श्रीं ह्रूं निरंजना

त्मने स्वाहा मध्यमाभ्यांवषट्॥ ॐ ऐं ह्रीं श्रीं निराभासात्मने स्वाहा अनामिकाभ्यांहुं॥ ॐ ऐं ह्रीं श्रीं

ह्रैं अनंततत्त्वस्त्रुस्मादेवीप्रचोदयात्स्वाहा कनिष्ठिकाभ्यांवौषट्॥ ॐ ऐं ह्रीं श्रीं ह्रः अव्यक्तबोधात्म

ने स्वाहा करतलकरपृष्ठाभ्यांफट्॥ इतिकरन्यासः॥ अथषडंगन्यासः॥ ॐ ऐं ह्रीं श्रीं ह्रां सूर्यात्मने

स्वाहा हृदयायनमः॥ ॐ ऐं ह्रीं श्रीं ह्रीं सोमात्मने स्वाहा शिरसे स्वाहा॥ ॐ ऐं ह्रीं श्रीं ह्रूं निरंजनात्मने

स्वाहा शिखायैवषट्॥ ॐ ऐं ह्रीं श्रीं ह्रैं निराभासात्मने स्वाहा कवचायहुं॥ ॐ ऐं ह्रीं श्रीं ह्रैं अनंततत्त्व

स्त्रुस्मादेवीप्रचोदयात्स्वाहा नेत्रत्रयायवौषट्॥ ॐ ऐं ह्रीं श्रीं ह्रः अव्यक्तबोधात्मने स्वाहा अस्त्रायफट्

इतिषडंगन्यासः॥ अथध्यानं॥ ॐ यां मूर्धानं यस्यविप्रावदंतिखंवैनाभिंचंद्रसूर्यौचनेत्रे॥ दिग्भिः

श्रोत्रेयस्य पादौ त्रितिनिस्त्र ध्यातव्योसौ सर्वश्चेनान्नरात्मा ॥ इति विराट्स्वरूपं स्वात्मानं ध्यात्वा ॥ नदउ
संधायी प्राणवायोः निर्गमप्रवेशात्मकमजपाजपं पंचविंशति वारं जप्त्वा समर्प्य ॥ गुरूपदिष्टमा
र्गेणनादानसंधानपूर्वकं निरस्तसमस्तोपाधिनाकेनापि विहिलासेन प्रवर्त्तमानोस्मीति वि।
भाव्य ॥ स्वकार्यानुष्ठानाय ॥ ॐ समुद्रमेखले देवि पर्वतस्तनमंडले ॥ विष्णुपत्नि नमस्तुभ्यं पादस्प
र्शं क्षमस्व मे ॥ इति भूमिं प्रार्थ्य ॥ श्वासानुसारेण तस्यां पादौ निधाय ॥ पदे पदे मूलं समुच्चरन् ॥ गृहाद्ब
हिर्निर्गन्तव्य ॥ ग्रामाद्बहिर्नैरृत्यां याम्यां वा दिशि शरक्षेपमात्रं भुवमतीत्य ॥ मलमूत्रोत्सर्गं शौचा
चमनं दंतधावनादिकं विधाय ॥ अनिषिद्धदिनेषु विहितकाष्ठेन ॥ क्लीं कामदेवाय सर्वजनप्रिया
य नमः ॥ इति दंतान्विशोध्य ॥ जिह्वामुल्लिख्य दंतकाष्ठं प्रक्षालितं ॥ पुरः शुद्धदेशे त्यक्त्वा ॥ मुखं मूले
न प्रक्षाल्याचम्य ॥ नद्यादितीरं गत्वा स्नानं कुर्यात् ॥ इति प्रातःकृत्यविधिः ॥ अथ स्नानविधिः ॥ त
तस्तीर्थाद्बहिः कटिशौचं विधाय ॥ मलापकर्षणस्नानं विधाय ॥ स्वशाखोक्तविधिना वैदिक।

का॰
ह॰
१८

16

स्नानंचविधाय॥नाभिमात्रेजलेस्थित्वा॥ॐअद्यतावत्तिथावद्याऽमुकमासस्याऽमुकपक्षस्यति।
थावमुकायांअमुकदिनेअमुकशर्माहंश्रीपरदेवताप्रीत्यर्थंतांत्रिकस्नानमहंकरिष्येइतिसं
कल्प्य॥प्राणायामंकृत्वा॥स्वमूलस्यऋष्यादिकरषडंगन्यासांश्चकृत्वा॥स्वपुरतोजलेहस्तमात्रंचतु
रस्रंतीर्थंपरिकल्प्य॥ॐब्रह्मांडोदरतीर्थानिकरैःस्पृष्टानितेरवे॥तेनसत्येनदेवेशतीर्थंदेहिदि
वाकर॥इतिसूर्यात्तीर्थंप्रार्थ्य॥क्रोंइत्यंकुशमुद्रयासूर्यमंडलेभित्त्वा॥ॐगंगेचयमुनेचैवगोदा
वरिसरस्वति॥नर्मदेसिंधुकावेरिजलेस्मिन्सन्निधिंकुरु॥आवाहयामित्वांदेविस्नानार्थमिहसु
दरि॥एहिगंगेनमस्तुभ्यंसर्वतीर्थसमन्विते॥इतिसूर्यमंडलात्तीर्थमाकृष्य॥पुरःकल्पिततीर्थे
संयोज्य॥पुनःसूर्यमंडलदेव॥ॐऐंह्रींश्रींह्रांह्रींह्रूंह्रैंह्रौंह्रःसर्वानंदमयेतीर्थशक्तेप्रह्येहिस्वाहा
इतितीर्थशक्तिमावाह्य॥तस्मिंस्तीर्थमंडलेतांध्यायेत्॥ॐसर्वानंदमयीमशेषदुरितध्वंसांमृगां।
कप्रभां॥अत्तावोर्हकरद्वयेनदधतींपाशसृणींचक्रमात्॥दोर्भ्यांचामृतपूर्णहेमकलशंसुस्नात

मालां वरां ॥ गंगां सिंधुसरिद्वयादिसहितां श्रीतीर्थशक्तिं भजे ॥ इति ध्यात्वा ॥ ॐ नमो भगवति गं
गे गंगांबिके अंबिके महामालिनि एह्येहि भगवति श्रीशेषतीर्थालवाले ह्रीं श्रीं शिवजटाधिरूढे
गंगे गंगांबिके स्वाहा ॥ इति मंत्रेण समभ्यभिमंत्र्य ॥ ह्रीमित्यालोड्य ॥ वमिति धेनुमुद्रयामृतीकृत्य ॥ मूलं
आत्मतत्त्वात्मने नमः ॥ मूलं विद्यातत्त्वात्मने नमः ॥ मूलं शिवतत्त्वात्मने नमः ॥ इति तत्त्वत्रयं जले विन्य
स्य ॥ तत्र श्रीचक्रं विभाव्य ॥ हृदयकमलाद्देवमावाह्य ॥ षडंगेन सकलीकृत्य ॥ तं स्वावरणैस्तर्पयित्वा
योनिमुद्रया मूलेन तज्जलमष्टधाभिमंत्र्य ॥ तत्र देवतास्मरणपूर्वकं त्रिर्निमज्ज्योन्मज्ज्य ॥ कुंभमुद्रया
मूलविद्यया स्वशिरसि त्रिरभिषिच्य ॥ मूलेन देवं त्रिः संतर्प्य ॥ देवं स्वहृदि समानीय ॥ मूलं श्रीकामे
श्वरतत्त्वत्रयं शोधयामि स्वाहा ॥ इति त्रिराचम्य ॥ तीरमारुह्य ॥ धौतवाससी परिधाय ॥ ॐ हंसः इति मं
त्रेण त्रिपुंड्रकमूर्ध्वपुंड्रकं वा तिलकं विधाय ॥ वैदिकसंध्यां समाप्य ॥ तांत्रिकीमारभेत् ॥ इति स्नान
विधिः ॥ अथ संध्या ॥ तत्र विधिवदाचम्य ॥ मूलेन त्रिः शिखां बद्ध्वा ॥ प्राणायामऋष्यादिकरषडंगन्या

का० ए० ११

सान्निधाय । स्वपुरतोपि तत्त्वमुद्रया । तथैव रचितं जलममृतीकृत्य । मूलेनाष्टधाभिमंत्र्य तेन जलेन त
त्त्वमुद्रया । ॐ ऐं ह्रीं श्रीं अं नमः । ॐ आं नमः । ॐ इं नमः । ॐ ईं नमः । ॐ उं नमः । ॐ ऊं नमः । ॐ ऋं नमः । ॐ ॠं नमः
ॐ ऌं नमः । ॐ ॡं नमः । ॐ एं नमः । ॐ ऐं नमः । ॐ ओं नमः । ॐ औं नमः । ॐ अं नमः । ॐ अः नमः । ॐ कं नमः । ॐ खं
नमः । ॐ गं नमः । ॐ घं नमः । ॐ ङं नमः । ॐ चं नमः । ॐ छं नमः । ॐ जं नमः । ॐ झं नमः । ॐ ञं नमः । ॐ टं नमः । ॐ
ठं नमः । ॐ डं नमः । ॐ ढं नमः । ॐ णं नमः । ॐ तं नमः । ॐ थं नमः । ॐ दं नमः । ॐ धं नमः । ॐ नं नमः । ॐ पं नमः । ॐ फं
नमः । ॐ बं नमः । ॐ भं नमः । ॐ मं नमः । ॐ यं नमः । ॐ रं नमः । ॐ लं नमः । ॐ वं नमः । ॐ शं नमः । ॐ षं नमः । ॐ सं नमः
ॐ हं नमः । ॐ ळं नमः । ॐ क्षं नमः । इति मातृकाक्षरैः स्वशिरः प्रोक्ष्य । मूलेन च त्रिः प्रोक्ष्य । दक्षहस्तेन जल
मादाय । वामहस्तेनाच्छाद्य । लं वं रं यं हं इति पांचभौतिकैर्मंत्रैः सप्तवारमभिमंत्र्य । मूलेन च त्रिरभि
मंत्र्य । तज्जलबिंदुभिर्वामहस्तच्युतैस्तत्त्वमुद्रया । मूलेन स्वशिरः त्रिः प्रोक्ष्य । अवशिष्टजलं वामहस्ते
निधाय । तेजोरूपं तज्जलमिडयाकृष्य । स्वदेहांतः स्थितं सकलकल्मषं प्रक्षाल्य । तज्जलं कृष्णव।

र्णपिंगलयावहिर्निर्गतं मत्वा॥ पुनर्दत्तहस्तेकृत्वा॥ स्ववामभागे ज्वलद्वज्रशिलां ध्यात्वा॥ ॐ ह्रौं
पशु हुं फट्॥ इति पाशुपतास्त्रमंत्रेण तस्यां शिलायामास्फाल्य॥ हस्तौ पादौ प्रक्षाल्य॥ मूलेन जल
मादाय॥ प्रवहन्नाड्या सहस्रदलपरमामृते तेनैकीभूतं विभाव्य॥ निर्गमय्य॥ तेन जलेन ग्रमृतमा।
लिन्यै स्वाहा॥ इति मंत्रेण ऋषेः स्वशिरस्त्रिः प्रोक्ष्य॥ मूलं आत्मतत्त्वं शोधयामि स्वाहा॥ मूलं विद्यातत्त्वं
शोधयामि स्वाहा मूलं शिवतत्त्वं शोधयामि स्वाहा॥ इति त्रिराचम्य॥ पतद्वैपरीत्येन त्रिराचम्य सर्वं मू
लं सर्वतत्त्वं शोधयामि स्वाहा॥ इति च त्रिराचम्य॥ इति नवधा जलेनाचम्य॥ जलमंजलिनादायोत्थाय
मूलं कामेश्वराय विद्महे॥ पाशीश्वराय धीमहि॥ तन्नः आत्मा प्रचोदयात्॥ श्रीकामेश्वर श्रीपादुकायै
एषोर्घ्यः स्वाहा॥ इति त्रिरर्घ्यं दत्वा॥ ॐ ह्रां ह्रीं हंसः श्रीसूर्य एषते र्घ्यः स्वाहा॥ ३॥ इति सूर्यायार्घ्यं द
त्वा॥ मूलेन त्रिः संतर्प्य॥ श्रीसूर्यं च त्रिः संतर्प्य प्राणायामादिः सर्वकं जपं कुर्यात्॥ देवतातर्पणं
कुर्यात्॥ पित्रादितर्पणं कुर्यात्॥ इति संध्याविधिः॥ अथ तर्पणम्॥ ह्रीं श्रीं भैरवास्तर्प्यन्तां॥

का॰
१८॰
१२
12

एवं क्षेत्रपालाः॥ कुमार्यः॥ योगिनीगणाः॥ सर्वे भूता॥ श्रीचक्रं त्रिकोणं वा जले विभाव्य॥ तत्र मूलेन
देवं देवीं विभाव्य॥ ध्यात्वा॥ मूलं श्रीकामेश्वरं सांगं सवाहनं सायुधं सपरिच्छदं तर्पयामि नमः॥ गुरू
न्संतर्प्य॥ ब्रह्मादिकीटपर्यन्तं संतर्प्य॥ पितृतर्पणं कुर्यात्॥ इति तर्पणम्॥ एवं वन्दे देवं संहारमुद्रया
स्वहृदि समानीय॥ शिवोऽहमिति भावयन्॥ यागमंडपं आगच्छेत्॥ ततः पादौ प्रक्षाल्य॥ ह्रीं हूं फट् इ
ति द्वारं प्रक्षाल्य॥ ॐ ऐं ह्रीं श्रीं गणेशाय नमः दक्षे॥ ॐ ऐं ह्रीं श्रीं क्षं क्षेत्रपालाय नमः वामे॥ ॐ ऐं ह्रीं श्रीं म
हामायायै नमः॥ ॐ ऐं ह्रीं श्रीं विघ्नविदारिण्यै नमः॥ ॐ ऐं ह्रीं श्रीं सरस्वत्यै नमः॥ ॐ ऐं ह्रीं श्रीं गंगायै नमः॥ ॐ
ऐं ह्रीं श्रीं यमुनायै नमः॥ ॐ ऐं ह्रीं श्रीं धात्रे नमः॥ ॐ ऐं ह्रीं श्रीं विधात्रे नमः॥ ॐ ऐं ह्रीं श्रीं नंदायै नमः॥
ॐ ऐं ह्रीं श्रीं आनंदायै नमः॥ ॐ ऐं ह्रीं श्रीं प्रचंडाय नमः॥ ॐ ऐं ह्रीं श्रीं क्षेत्रपालाय नमः॥ ॐ ऐं ह्रीं श्रीं वे
तालाय नमः॥ ॐ ऐं ह्रीं श्रीं अग्निवेतालाय नमः॥ इति संपूज्य॥ यागमंडपं प्रविश्य॥ मूलमुच्चार्य॥ आ
सनशोधनं कुर्यात्॥ ॐ अस्य श्रीआसनशोधनमंत्रस्य॥ मेरुपृष्ठ ऋषिः॥ सुतलं छंदः॥ कूर्मो देवता

आसनारोपणे विनियोगः ॥ इति कृतांजलिः स्मरन्नमेत् ॥ मेरुपृष्ठऋषये नमः शिरसि ॥ सुत
लंछंदसे नमः मुखे ॥ कूर्मदेवतायै नमः हृदि ॥ आसनारोपणे विनियोगः सर्वांगेषु ॥ इति ऋष्या
दिन्यासः ॥ अथ करन्यासः ॥ ह्रीं आं क्रों अंगुष्ठाभ्यां नमः ॥ ह्रीं आं क्रों तर्जनीभ्यां स्वाहा ॥ ह्रीं आं क्रों म
ध्यमाभ्यां वषट् ॥ ह्रीं आं क्रों अनामिकाभ्यां हुं ॥ ह्रीं आं क्रों कनिष्ठिकाभ्यां वौषट् ॥ ह्रीं आं क्रों करतल
करपृष्ठाभ्यां फट् ॥ अथ करन्यासः ॥ अथ षडंगन्यासः ॥ ह्रीं आं क्रों हृदयाय नमः ॥ ह्रीं आं क्रों शिरसे
स्वाहा ॥ ह्रीं आं क्रों शिखायै वषट् ॥ ह्रीं आं क्रों कवचाय हुं ॥ ह्रीं आं क्रों नेत्रत्रयाय वौषट् ॥ ॐ आं क्रों अस्त्रा
यफट् ॥ इति षडंगन्यासः ॥ अथ ध्यानं ॥ ॐ ध्यायेत्कूर्मं महाविष्णुं सर्वाधारस्वरूपकं ॥ श्रीवत्सकौस्तु
भयस्य सायकस्थितिकारकं ॥ दुष्टनिर्दारणपरं नीलवर्णं चतुर्भुजं ॥ शंखचक्रगदापद्मकिरीटव
नमालिकं ॥ पृष्ठस्यामदिशो ध्यायेन्मीनावरयुगाहृतां ॥ द्राविणीं आमिरीशक्तियुतं देवि विचिंतये
त् ॥ ॐ ऐं ह्रीं श्रीं श्रीं पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनं

का. इति पृथ्वी प्राच्यां ॥ ॐ ऐं ह्रीं श्रीं मण्डूकाय नमः ॥ ॐ ऐं ह्रीं श्रीं कालाग्निरुद्राय नमः ॥ ॐ ऐं ह्रीं श्रीं मूल
इ. प्रकृत्यै नमः ॥ ॐ ऐं ह्रीं श्रीं आधारशक्त्यै नमः ॥ ॐ ऐं ह्रीं श्रीं कूर्माय नमः ॥ ॐ ऐं ह्रीं श्रीं अनन्ताय नमः ॥
११ ॐ ऐं ह्रीं श्रीं वराहाय नमः ॥ ॐ ऐं ह्रीं श्रीं पृथिव्यै नमः ॥ ॐ ऐं ह्रीं श्रीं आधारशक्तिकमलासनाय नमः
13 इति संपूज्य ॥ रक्तगंधाम्बरस्रगाभरणभूषितसंबलाशरितभ्रवः कर्पूरमृगनाभिस्वाशि
तांगः ॥ हारकेयूरांकितशरीरः ॥ शिवोहमिति भावयन् ॥ गुरूपदिष्टविधिना श्रीचक्रं पुरतः सं
स्थाप्य ॥ मूलेन पुष्पांजलित्रितयं ॥ स्ववामाग्रे भूतेभ्यो नमः ॥ भूतबलिं दत्वा ॥ भूतानि यानीह वसं
ति भूतले बलिं गृहीत्वा विधिवत्प्रयुक्तं ॥ अन्यत्र वासं परिकल्पयन्तु क्षमन्तु चान्यत्र नमोस्तु ते
भ्यः ॥ इति भूतबलिं विसृज्य ॥ मूर्ध्नि संचरद्ब्रह्मद्वादशान्तरुपादुकाभ्यो नमः ॥ संवित्शोधनं कुर्यात्
तद्विधिर्यथा ॥ संविदे ब्रह्मसंभूते ब्रह्मपुत्रि सदानघे ॥ ब्राह्मणानां च तृप्त्यर्थं पवित्रा भव सर्वदा
ॐ ब्राह्मण्यै नमः स्वाहा ॥ ॐ सिद्धमूलव्रतये देवि हीनबोधप्रबोधिनी ॥ राजप्रजावशंकरि श

भुपत्तनिस्यन्दिनि ॥ ऐं त्रिवियायै नमः स्वाहा ॥ ॐ अत्तानेयनदीमाग्रेत्ता नाग्निब्रह्मरूपिणि
आनंददायाह्वनितिप्रीतिं सम्यग्ज्ञानं प्रयच्छ मे ॥ ह्रीं वैष्णायै नमः स्वाहा ॥ ॐ नमस्वामिन मस्वामि
योगमार्गप्रदर्शिनि ॥ त्रैलोक्यविजये मातः समाधिफलदा भव ॥ क्लीं शूद्रायै नमः स्वाहा ॥ इत्य
भिमंत्र्य ॥ ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतमाकर्षय ॥ सिद्धिं देहि श्रीकामेश्वर
पदमेव शमानय स्वाहा ॥ इति तदुपरि समयामूलं जप्त्वा ॥ धेनुमुद्रयामृतीकृत्य ॥ योनिं प्र
दर्श्य ॥ हस्मिम्रवंशे ब्लू फट् इति संरक्ष्य ॥ मूलं आगच्छागच्छ ॥ संतिष्ठ संतिष्ठ ॥ सन्निधेहि ॥ स
न्निधेहि ॥ सन्निरुद्धस्व ॥ सन्निरुद्धस्व संमुखी भव संमुखी भव ॥ इत्यावाहनादिमुद्राः संप्रदर्श्य
तालत्रयेण दिव्यदृष्ट्या वामपार्ष्णिघातत्रयेण च ॥ त्रिविधविघ्नानुत्सार्य ॥ छोटिकाभिः फ
डिति दशदिग्बन्धनं विधाय ॥ वामहस्तलग्नतत्त्वमुद्रया ॥ आदौ भ्रूमध्ये श्रीकामेश्वरं च त्रिधा
संतर्प्य ॥ स्वशिरसि श्रीगुरुं त्रिवारं संतर्प्य ॥ संवित्सीकारं ऊर्ध्वं नयेत् यथा ॥ ऐं वद वद वाग्वादि

निममजिह्वाग्रे स्थिरीभव सर्वसत्त्ववशंकरि स्वाहा ॥ इत्यनेन मुखेन्नुयात् ॥ ततः आनंदम
यो भूत्वा ॥ भूतशुद्धिं कुर्याद्यथा ॥ ॐ अस्य श्री भूतशुद्धिमहामंत्रस्य ॥ ब्रह्मऋषिः ॥ देवीगाय
त्रीछंदः ॥ आकाशवाय्वग्निजलभूमयो देवता हं यं रं लं वं बीजानि ॥ मम पांचभौतिकशरीर
शोधनार्थे जपे विनियोगः ॥ इति कृतांजलिः स्मृत्वा न्यसेत् ब्रह्मऋषये नमः शिरसि देवी
गायत्रीछंदसे नमः मुखे ॥ आकाशवाय्वग्निजलभूमिदेवताभ्यो नमः हृदि ॥ हं यं रं लं वं बीजे
भ्यो नमः गुह्ये ॥ मम पांचभौतिकशरीरशोधनार्थे जपे विनियोगः सर्वांगेषु ॥ इति ऋष्यादि
न्यासः ॥ अथ करन्यासः ॥ लं यं रं वं हं अतनुसूक्ष्माप्रभेदात्मने अंगुष्ठाभ्यां नमः ॥ लं यं रं वं हं
अव्यक्तप्रबोधात्मने तर्जनीभ्यां स्वाहा ॥ लं यं रं वं हं अचिंत्यगुणात्मने मध्यमाभ्यां वषट् ॥
लं यं रं वं हं अनंतविद्यात्मने अनामिकाभ्यां हुं ॥ लं यं रं वं हं अभेद्यकवचात्मने कनिष्ठिका
भ्यां वौषट् ॥ लं यं रं वं हं अलभ्यगम्यात्मने करतलकरपृष्ठाभ्यां फट् ॥ इति करन्यासः अथष

ङ्गः ॥ लं यं रं वं हं अनन्तसूक्ष्मात्मप्रभेदात्मने हृदयाय नमः ॥ लं यं रं वं हं अव्यक्तप्रबोधा
त्मने शिरसे स्वाहा ॥ लं यं रं वं हं अचिन्त्यप्राणात्मने शिखायै वषट् ॥ लं यं रं वं हं अनन्तविद्या
त्मने कवचाय हुं ॥ लं यं रं वं हं अभेद्यकवचात्मने नेत्रत्रयाय वौषट् ॥ लं यं रं वं हं अलुप्तगत्या
त्मने अस्त्राय फट् ॥ इति षडंगन्यासः ॥ अथ ध्यानं ॥ पांचभौतिकसंभूतं कलापंचकसंयुतं ॥ ब्र
ह्मादिपंचसंयुक्तं पंचीकरणवर्गकं ॥ पंचपंचात्मकमिदं शिवरूपं नतं भजे ॥ ॥ पादादिजा
नुपर्यन्तं पृथ्वीस्थानं च चतुरस्रं वज्रलांछितं पीतवर्णं ब्रह्मदैवतं निवृत्तिकलाधिष्ठितं लं
बीजयुतं ध्यात्वा ॥ जान्वादिनाभिपर्यन्तं अपांस्थानं शुक्लवर्णं अर्धचंद्राकारं शृंगद्वयेपि पद्म
लांछितं विष्णुदैवतं वं बीजयुतं ध्यात्वा ॥ नाभ्यादिकंठपर्यन्तं वह्निमंडलं स्वस्तिकोपेतं त्रि
कोणाकारं रक्तवर्णं रुद्रदैवतं विद्याकलाधिष्ठितं रं बीजयुतं ध्यात्वा ॥ कंठादिभ्रूमध्यपर्य
न्तं वायुमंडलं षट्कोणाकारं षड्बिंदुलांछितं वृत्तोपेतं कृष्णवर्णमीश्वरदैवतं शान्तिक।

का॰ ह॰ १५

लाधिष्ठितं यंबीजयुतं ध्यात्वा॥ भ्रूमध्यादिब्रह्मरंध्रांतं आकाशस्थानं वृत्ताकारं ध्वजलांछितं
स्वच्छवर्णं॥ सदाशिवदैवतं॥ शांत्यतीताकलाधिष्ठितं हंबीजयुतं ध्यात्वा॥ तत्रपंचभूतमये दे
हे धर्मकंदसमुद्भूतं ज्ञाननालकमैश्वर्याष्टदलोपेतं॥ परवैराग्यकर्णिकं स्वहृदयारविं
दं ध्यात्वा॥ तत्कर्णिकायां जीवात्मानमाराग्रमात्रं प्रदीपकलिकाभास्वरमनादिसत्तासंबद्ध
न परचिद्रूपं संचिंत्य॥ प्रागुक्तरूपेण मूलाधारात्कुंडलिनीमुत्थाप्य॥ सुषुम्णावर्त्मना मू
लाधाराद्यनाहतांतस्थवर्णवर्णाधिदेवताग्रसंतीं हृदयकमलमानीय तयाकवलीकृतं
जीवात्मानं ध्यायन्॥ सुषुम्णावर्त्मना विशुद्धादिचक्रस्थवर्णवर्णाधिदेवताग्रसंतीं ब्रह्म
रंध्रं नीत्वा॥ तत्रस्थितसहस्रदलकमलकर्णिकामध्यवर्तिनीपरमात्मज्योतिषि स्ववर्णव
र्णदेवताकदंबकं जीवात्मानं हंसइति मंत्रेण संयोज्य॥ कुंडलिनीं स्वस्थानमानीय॥ तत्संहा
रं कुर्यात्॥ तत्र पृथिवीस्थाने॥ पादेंद्रियगमनक्रियागंतव्यगंधघ्राणपृथिवीब्रह्मनि

हृत्तिसमानावायुन्संस्मरेत्। ॐ ह्रांब्रह्मणेपृथिव्यधिपतयेनिवृत्तिकलात्मनेहुंफट्स्वा
हा। इतिमंत्रेणकुंडलिनीहाराग्रपानमध्येसंहरेत्। ततोऽपानस्थानेहस्तादानदानव्यानस्पर
सनाजलविष्णुप्रतिष्ठोदानान्संचिंत्य। ॐ ह्रींविष्णवेजलाधिपतयेप्रतिष्ठाकलात्मनेहुंफ
ट्स्वाहा। इतितान्सर्वान्कुंडलिनीहारावह्निमध्येसंहरेत्। ततोवह्निस्थानेपायुविसर्गवि
सर्जनीयरूपचक्षुर्वह्निरुद्रविद्याव्यानान्स्मरेत्। ॐ ह्रूंरुद्रायतेजोधिपतयेविद्याकला
त्मनेहुंफट्स्वाहा। इतितान्सर्वान्वायुमंडलेसंहरेत्। ततोवायुस्थानेउपस्थानेदत्तहिषयस्प
र्शस्पृष्टव्यवायवीश्वरशांत्यऽपानान्संस्मरेत्। ॐ ह्रैंईश्वरायवाय्वधिपतयेशांतिकलात्मनेहुं
फट्स्वाहा। इतितान्सर्वान्कुंडलिन्यांसंहृत्य। तोविंदुशक्तौ। विंदुशक्तिंनादशक्तौ। नादशक्तिं
परमशक्तौप्रणवेणसंहृत्य। ॐ ह्रौंहुंफट्स्वाहा। इतितांपरमशक्तिंएवंक्तपरमात्मनिनि
योज्य। केवलशरीरेवामऊर्ध्वौपापपुरुषंचिंतयेद्यथा। ॐ वामकुक्षिस्थितंपापपुरुषंकज्ज

का॰ पू॰ १९

16

लम्बभं ॥ ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयं ॥ सुरापानहृदा युक्तं गुरुतल्पकटिद्वयं ॥ तत्सं
सर्गपदद्वंद्वमंगप्रत्यंगपातकं ॥ २ ॥ उपपातकरोमाणं रक्तश्मश्रुविलोचनं ॥ अधोमुखं कृष्णव
र्णं अंगुष्ठपरिमाणकं ॥ ३ ॥ समस्तासुरपत्नीनां वर्धनं कल्मषात्मकं ॥ खड्गचर्मधरं क्रुद्धं पापं कु
क्षौ विचिंतयेत् ॥ ४ ॥ इति पापपुरुषं विचिंत्य ॥ वामनासारंध्रेण यंवीजेन सह वायुमापूर्य ॥ ना
भिस्थषट्कोणाकारे वायुमंडले संयोज्य ॥ तत्र यमिति वायुवीजं कृष्णवर्णं संचिंत्य ॥ कुंभके
न यमिति वायुवीजमावर्तयंस्तदुत्थितेन महावायुना स्वपापपुरुषं स्वशरीरस्थं संशोष्य
वायुं दक्षिणनासया विरेच्य ॥ पुनर्दक्षिणनासया रं वीजेन सह वायुमापूर्य ॥ मूलाधारे सं
योज्य ॥ तत्रस्थवह्निमंडले रमिति वह्निवीजं रक्तवर्णं विचिंत्य ॥ कुंभकेन रमिति वीजमाव
र्तयंस्तदुत्थितवह्निना स्वपापपुरुषं स्वशरीरस्थं संदह्य ॥ पापपुरुषभस्मना सह दक्षिणेन वायुं वा
मनासया विरेच्य ॥ पुनर्वामनासया वं वीजेन सह वायुमापूर्य ब्रह्मरंध्रे संयोज्य ॥ तत्रस्थ चंद्र

मंडले वह्निस्वरूपं तवीजं शुक्लवर्णं विचिंत्य ॥ कुंभकेन वंवीजमावर्तयन् तज्जस्यामृतधार
यास्वदेहं भस्मप्लावितं विभाव्य ॥ तं वायुं दक्षिणनासया विरेच्य ॥ पुनर्दक्षनासया लंवीजेन स
हवायुमापूर्य ॥ मूलाधारस्य पार्थिवमंडले संयोज्य ॥ तत्र लमिति पृथ्वीवीजं पीतवर्णं संवि
त्य ॥ कुंभकेन लंवीजमावर्तयेत्तद्भूतेन तेजसामृतप्लावितभस्मघनीकृत्य ॥ तं वायुं वाम
नासया विरेच्य ॥ पुनर्वामनासया मायावीजेन वायुमापूर्य ॥ मूलाधारस्य विंदुमध्ये मायावी
जं स्फुरद्बालार्कवर्णं संचिंत्य ॥ कुंभकेन मायावीजमावर्तयंस्तेन करचरणाद्यवयवसमेतं
स्वदेहं निष्पन्नं विभाव्य ॥ तं वायुं दक्षनासया विरेचयेत् ॥ इति स्थूलशरीरं निष्पाद्य ॥ सूक्ष्म
शरीरं निष्पादयेत् ॥ तत्र पूर्वोक्तसहस्रारकमलस्य परमात्मनः सकाशात्सकलजगत्सि
सृक्षाविजृंभितपरब्रह्मस्वरूपिणीं पराशक्तिं ह्रीं नमः ॥ इति मंत्रेण स्वस्थानमानीय ॥ त
तो नादशक्तिं विंदुशक्तिं प्रणवेन सृष्ट्वा ॥ विंदुशक्तेः सकाशात्सकलजगत्सृष्टिहेतुभूतां

का० ए० १८

17

कुंडलिनीं प्रणवेन निःसार्य ॥ ततः ॥ ॐ ह्रैं सदाशिवायाकाशाधिपतये शांत्यतीताकलात्म
ने नमः ॥ इति प्राणः शांत्यतीता सदाशिवायाकाशश्रोत्रशब्द्वक्तव्यवचनवाच आकाश
स्थाने स्थापयेत् ततः आकाशमंडलात् ॐ ह्रीं ईश्वराय वाय्वधिपतये शांतिकलात्मने
नमः ॥ इत्यपानः शांतिरीश्वरवायुत्वक्स्पर्शस्पृष्टव्यतद्विषयानंदोपस्थान्वायुस्थाने स्थाप
येत् ॥ ततः ॥ ॐ ह्रूं रुद्राय तेजोधिपतये विद्याकलात्मने नमः ॥ इति व्यानविद्यारुद्रतेजश्च
क्षुरूपविसर्जनीयविसर्गपायुस्तदग्निस्थाने स्थापयेत् ॥ ततः ॥ ॐ ह्रौं विष्णवे जलाधिपतये
प्रतिष्ठाकलात्मने नमः ॥ इति उदानप्रतिष्ठा ॥ विष्णुजलरसनारसदातव्यदानहस्तानपां
स्थाने स्थापयेत् ॥ ततः ॥ ॐ ह्रां ब्रह्मणे पृथिव्यधिपतये निवृत्तिकलात्मने नमः ॥ इति समा
ननिवृत्ति ॥ ब्रह्मपृथिवीघ्राणगंधगंतव्यगमनक्रियापादेंद्रियाणि पृथिवीस्थापयेत्
ततः प्रणवेन कुंडलिनीं स्वस्थाने स्थापयेत् ॥ नादशक्तिबिंदुशक्तिपरमशक्तीनां प्रणवे

नत्वदेहेव्याप्तिं विभाव्य ॥ सोहमिति मंत्रेण ब्रह्मरंध्रस्थपरमात्मनः सकाशात् कुंडलिनी जी
वात्मानं चतुःसप्ततवर्णवर्णाधिदेवतासहितमात्रादिचक्रेषु तत्तद्वर्णवर्णाधिदेवता स्था
पयेत् ॥ हृदयकमलमानीय ॥ हृदयकमले जीवात्मानं स्थापयित्वा ॥ कुंडलिनी सुषुम्णा
मार्गेण मणिपूरकादिचक्रेषु ॥ तत्तद्वर्णवर्णाधिदेवताः स्थापयेत् ॥ मूलाधारं नीत्वा ॥ तत्र
स्थापयेत् ॥ ततः स्वशरीरं निरस्तसकलकल्मषं देवतायतनयोग्यं विभाव्य ॥ प्राणप्रति
ष्ठां कुर्यात् ॥ इति भूतशुद्धिविधिः ॥ अथ प्राणप्रतिष्ठा ॥ ॐ अस्य श्री प्राणप्रतिष्ठामंत्रस्य ॥
श्री ब्रह्मविष्णुशिव ऋषयः ॥ ऋग्यजुःसामानि छंदांसि ॥ पराप्राणशक्तिर्देवता ॥ आं बी
जं ॥ ह्रीं शक्तिः ॥ क्रों कीलकं ॥ मम श्री प्राणप्रतिष्ठार्थे विनियोगः ॥ इति कृतांजलिः स्मरता
मस्तेन् ॥ श्री ब्रह्मविष्णुशिव ऋषिभ्यो नमः शिरसि ॥ ऋग्यजुःसामछंदोभ्यो नमो मुखे ॥ प
राप्राणशक्तिर्देवतायै नमः हृदये ॥ आं बीजाय नमः गुह्ये ॥ ह्रीं शक्तये नमः पादयोः ॥ क्रों

का॰
ष॰
१८

कीलकाय नमः नाभौ ॥ मम प्राणप्रतिष्ठार्थे विनियोगः ॥ सर्वांगे ॥ इति ऋष्यादिन्यासः ॥ अथ क
रन्यासः ॥ ॐ आं ह्रीं क्रों अं कं खं गं घं ङं॰ आकाशवाय्वग्निसलिलपृथिव्यात्मने आं अंगुष्ठाभ्यां न
मः ॥ ॐ आं ह्रीं क्रों ईं चं छं जं झं ञं शब्दस्पर्शरूपरसगंधात्मने ईं तर्जनीभ्यां स्वाहा ॥ ॐ आं ह्रीं क्रों
उं टं ठं डं ढं णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं मध्यमाभ्यां वषट् ॥ ॐ आं ह्रीं क्रों एं तं थं दं धं नं
वाक्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां हुं ॥ ॐ आं ह्रीं क्रों ओं पं फं बं भं मं वचनादान
विसर्गगमनानंदात्मने औं कनिष्ठिकाभ्यां वौषट् ॥ ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं लं क्षं मनो
बुद्ध्यहंकारचित्तात्मने अः करतलकरपृष्ठाभ्यां फट् ॥ इति करन्यासः ॥ अथ षडंगन्यासः ॥
ॐ आं ह्रीं क्रों अं कं खं गं घं ङं॰ आकाशवाय्वग्निसलिलपृथिव्यात्मने आं हृदयाय नमः ॥ ॐ आं
ह्रीं क्रों ईं चं छं जं झं ञं शब्दस्पर्शरूपरसगंधात्मने ईं शिरसे स्वाहा ॥ ॐ आं ह्रीं क्रों उं टं ठं डं ढं णं
श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं शिखायै वषट् ॥ ॐ ह्रीं क्रों एं तं थं दं धं नं वाक्पाणिपादपा

हृदयस्यात्मने ऐं कवचाय हुं॥ ॐ श्रां ह्रीं क्रों ॐ पं फं बं भं मं वचनादानविसर्गगमनानंदात्म
ने ॐ नेत्रत्रयाय वौषट्॥ ॐ श्रां ह्रीं क्रों श्रं यं रं लं वं शं षं सं हं लं क्षं: मनोबुद्ध्यहंकारचित्तात्मने श्रः
अस्त्राय फट्॥ इति षडंगः॥ ततः नाभ्यादिपादद्वयांतं॥ श्रां नमः॥ हृदादिनाभ्यंतं॥ ह्रीं नमः॥ मू
र्द्धादिहृदंतं॥ क्रों नमः॥ हृदयकमलमध्ये॥ ॐ ऐं ह्रीं श्रीं यं त्वगात्मने नमः॥ पूर्वदले॥ ॐ ऐं ह्रीं श्रीं
रं असृगात्मने नमः॥ पश्चिमे॥ ॐ ऐं ह्रीं श्रीं लं मांसात्मने नमः॥ आग्नेये॥ ॐ ऐं ह्रीं श्रीं वं मेदसात्म
ने नमः॥ वायव्ये॥ ॐ ऐं ह्रीं श्रीं शं अस्थ्यात्मने नमः॥ ईशाने॥ ॐ ऐं ह्रीं श्रीं षं मज्जात्मने नमः॥ नैरृते॥
ॐ ऐं ह्रीं श्रीं सं शुक्रात्मने नमः॥ उत्तरे॥ ॐ ऐं ह्रीं श्रीं हं प्राणात्मने नमः॥ दक्षिणे॥ ॐ ऐं ह्रीं श्रीं लं जीवा
त्मने नमः॥ पुनः कर्णिकामध्ये॥ ॐ ऐं ह्रीं श्रीं क्षं: परमात्मने नमः॥ इति विन्यस्य ध्यायेद्यथा॥ ॐ र
क्ताब्धिपोतारुणपद्मसंस्थां पाशांकुशादिक्षुशरासबाणान्॥ शूलं कपालं दधतीं कराब्जैर
क्तां त्रिनेत्रां प्रणमामि देवीं॥ इति ध्यात्वा हृदि हस्तं निधाय॥ ॐ श्रां ह्रीं क्रों यं रं लं वं शं षं सं हं लं

का० तं: ह्रौं हंसः सोहं श्रीकामेश्वरस्य प्राणा इह प्राणाः ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं ळं क्षं: ह्रौं हंसः सो
ए० हं श्रीकामेश्वरस्य जीव इह स्थितः ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं ळं क्षं: ह्रौं हंसः सोहं श्रीकामेश्वर।
१९ स्य सर्वेन्द्रियाणि इह स्थितानि ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं ळं क्षं: ह्रौं हंसः सोहं श्रीकामेश्वरस्य
19 वाङ्मनस्त्वक्चक्षुश्श्रोत्रजिह्वाघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ इति प्राणप्रतिष्ठां विः
सकृद्धाजस्वा ॥ निजवपुर्ज्योतिर्मयं ध्यायेत् ॥ इति प्राणप्रतिष्ठा ॥ अथ मातृकान्यासः ॥ तत्र स्वरैः ॥
पूरकः ॥ कादिमान्तैः कुंभकः ॥ यादिभी रेचकः इति मातृकाप्राणायामं कृत्वा ॥ संकल्पं कुर्यात् ॥ त
त्रादावंतर्मातृकान्यासः ॥ ॐ अस्य श्रीअंतर्मातृकान्यासस्य ॥ श्रीब्रह्मा ऋषिः ॥ गायत्रं छंदः ॥ श्रीअंत
र्मातृकासरस्वती देवता ॥ हलो बीजानि ॥ स्वराः शक्तयः ॥ अव्यक्तं कीलकं ॥ मम श्रीकामेश्वरांगत्वेन
न्यासे विनियोगः ॥ इति कृतांजलिः स्मृत्वा न्यसेत् ॥ श्रीब्रह्मऋषये नमः शिरसि ॥ गायत्रछंदसे नमो
मुखे ॥ श्रीअंतर्मातृकासरस्वतीदेवतायै नमः हृदि ॥ हल्भ्यो बीजेभ्यो नमः गुह्ये ॥ स्वरेभ्यः शक्तिभ्यो

नमः पादयोः ॥ श्रम् क्राय कीलकाय नमः नाभौ ॥ मम श्रीकामेश्वरांगत्वेन न्यासे विनियोगः ॥
सर्वांगेषु ॥ इति ऋष्यादिन्यासः ॥ अथ करन्यासः ॥ ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं आं अंगुष्ठाभ्यां नमः ॥
ॐ ऐं ह्रीं श्रीं इं चं छं जं झं ञं ईं तर्जनीभ्यां स्वाहा ॥ ॐ ऐं ह्रीं श्रीं उं टं ठं डं ढं णं ऊं मध्यमाभ्यां वषट् ॥ ॐ ऐं ह्रीं
श्रीं एं तं थं दं धं नं ऐं अनामिकाभ्यां हुं ॥ ॐ ऐं ह्रीं श्रीं ओं पं फं बं भं मं औं कनिष्ठिकाभ्यां वौषट् ॥ ॐ ऐं ह्रीं श्रीं
अं यं रं लं वं शं षं सं हं लं क्षं अः करतलकरपृष्ठाभ्यां फट् ॥ इति करन्यासः ॥ अथ षडंगन्यासः ॥ ॐ ऐं
ह्रीं श्रीं अं कं खं गं घं ङं आं हृदयाय नमः ॥ ॐ ऐं ह्रीं श्रीं इं चं छं जं झं ञं ईं शिरसे स्वाहा ॥ ॐ ऐं ह्रीं श्रीं उं
टं ठं डं ढं णं ऊं शिखायै वषट् ॥ ॐ ऐं ह्रीं श्रीं एं तं थं दं धं नं ऐं कवचाय हुं ॥ ॐ ऐं ह्रीं श्रीं ओं पं फं बं भं मं औं
नेत्रत्रयाय वौषट् ॥ ॐ ऐं ह्रीं श्रीं अं यं रं लं वं शं षं सं हं लं क्षं अः अस्त्राय फट् ॥ इति षडंगः ॥ अथ ध्यानम् ॥
ॐ व्योम्नि मंद्रो रसनार्णकर्णिकमचां द्वंद्वैः स्फुरत्केसरं पत्रांतर्गतपंचवर्गयशलार्णादित्रिवर्गक्र
मात् ॥ आशास्वश्रिषु लांतलांगलियुजा क्षोणीपुरेणावृतं वर्णाब्जं शिरसि स्थितं विषगदघ्न

का. स. २०

20

धं समृत्युंजयं ॥ इति वर्णकमलं शिरसि ध्यात्वा ॥ मूलाधारध्वनिं श्रुत्वा प्रबुद्धां शशिकुंडलीं ॥ ज्वल
त्पावकसंकाशां सूक्ष्मतेजःस्वरूपिणीं ॥ मूलाधाराच्छिरःपद्मे स्पृशंतीं विद्युदाकृतिं ॥ तया स्पृष्ट
शिरःपद्मादमृतौघस्वरूपिणः ॥ निर्गतान्मातृकावर्णान्सुषुम्णावर्त्मनागतं ॥ व्यापयित्वाखि
लान्सर्वानेवं ध्यात्वा प्रविन्यसेत् ॥ ओं ऐं ह्रीं श्रीं अं नमः ॥ ओं ऐं ह्रीं श्रीं आं नमः ॥ ओं ऐं ह्रीं श्रीं इं नमः ॥ ओं
ऐं ह्रीं श्रीं ईं नमः ॥ ओं ऐं ह्रीं श्रीं उं नमः ॥ ओं ऐं ह्रीं श्रीं ऊं नमः ॥ ओं ऐं ह्रीं श्रीं ऋं नमः ॥ ओं ऐं ह्रीं श्रीं ॠं नमः ॥
ओं ऐं ह्रीं श्रीं ऌं नमः ॥ ओं ऐं ह्रीं श्रीं ॡं नमः ॥ ओं ऐं ह्रीं श्रीं एं नमः ॥ ओं ऐं ह्रीं श्रीं ऐं नमः ॥ ओं ऐं ह्रीं श्रीं ओं न
मः ॥ ओं ऐं ह्रीं श्रीं औं नमः ॥ ओं ऐं ह्रीं श्रीं अं नमः ॥ ओं ऐं ह्रीं श्रीं अः नमः ॥ इति कंठषोडशदले ॥ ओं ऐं ह्रीं श्रीं
कं नमः ॥ ओं ऐं ह्रीं श्रीं खं नमः ॥ ओं ऐं ह्रीं श्रीं गं नमः ॥ ओं ऐं ह्रीं श्रीं घं नमः ॥ ओं ऐं ह्रीं श्रीं ङं नमः ॥ ओं ऐं ह्रीं श्रीं
चं नमः ॥ ओं ऐं ह्रीं श्रीं छं नमः ॥ ओं ऐं ह्रीं श्रीं जं नमः ॥ ओं ऐं ह्रीं श्रीं झं नमः ॥ ओं ऐं ह्रीं श्रीं ञं नमः ॥ ओं ऐं ह्रीं श्रीं
टं नमः ॥ ओं ऐं ह्रीं श्रीं ठं नमः ॥ इति अनाहते द्वादशदले ॥ ओं ऐं ह्रीं श्रीं डं नमः ॥ ओं ऐं ह्रीं श्रीं ढं नमः ॥ ओं

ॐ ऐं ह्रीं श्रीं णं नमः ॥ ॐ ऐं ह्रीं श्रीं तं नमः ॥ ॐ ऐं ह्रीं श्रीं थं नमः ॥ ॐ ऐं ह्रीं श्रीं दं नमः ॥ ॐ ऐं ह्रीं श्रीं धं न
मः ॥ ॐ ऐं ह्रीं श्रीं नं नमः ॥ ॐ ऐं ह्रीं श्रीं पं नमः ॥ ॐ ऐं ह्रीं श्रीं फं नमः ॥ इति नाभौ दशदले ॥ ॐ ऐं ह्रीं श्रीं बं न
मः ॥ ॐ ऐं ह्रीं श्रीं भं नमः ॥ ॐ ऐं ह्रीं श्रीं मं नमः ॥ ॐ ऐं ह्रीं श्रीं यं नमः ॥ ॐ ऐं ह्रीं श्रीं रं नमः ॥ ॐ ऐं ह्रीं श्रीं लं नमः
इति लिंगमूले षड्दले ॥ ॐ ऐं ह्रीं श्रीं वं नमः ॥ ॐ ऐं ह्रीं श्रीं शं नमः ॥ ॐ ऐं ह्रीं श्रीं षं नमः ॥ ॐ ऐं ह्रीं श्रीं सं नमः
इति मूलाधारे चतुर्दले ॥ ॐ ऐं ह्रीं श्रीं हं नमः ॥ ॐ ऐं ह्रीं श्रीं क्षं नमः ॥ इति भ्रूमध्ये द्विदले ॥ इत्यन्तर्मातृका ।

॥ न्यासः ॥

अथ बहिर्मातृकान्यासः ॥ तत्रादौ प्राणायामः ॥ ॐ अस्य श्रीबहिर्मातृकान्यासस्य ॥ श्रीब्रह्मा ऋषिः
गायत्रं छंदः ॥ श्रीबहिर्मातृका सरस्वती देवता ॥ हलो बीजानि ॥ स्वराः शक्तयः ॥ अव्यक्तं कीलकं ॥ म
म श्रीकामेश्वरांगत्वेन बहिर्मातृकान्यासे विनियोगः ॥ इति कृतांजलिः स्तत्वान्यसेत् ॥ श्रीब्रह्मऋ
षये नमः शिरसि ॥ गायत्रछंदसे नमो मुखे ॥ श्रीबहिर्मातृकासरस्वतीदेवतायै नमः हृदि ॥ हल्भ्यो

का॰
पू॰
२१

वीजेभ्यो नमो। गुह्ये। स्वरेभ्यो शक्तिभ्यो नमः। पादयोः। अव्यक्ताय कीलकाय नमः। नाभौ। मम श्रीका
मेश्वरांगत्वेन न्यासे विनियोगः। सर्वांगेषु। इति ऋष्यादिन्यासः। अथ करन्यासः। ॐ ऐं ह्रीं श्रीं अं कं
खं गं घं ङं॰ आं अंगुष्ठाभ्यां नमः। ॐ ऐं ह्रीं श्रीं इं चं छं जं झं ञं ईं तर्जनीभ्यां स्वाहा। ॐ ऐं ह्रीं श्रीं उं टं ठं डं ढं णं
ऊं मध्यमाभ्यां वषट्। ॐ ऐं ह्रीं श्रीं एं तं थं दं धं नं ऐं अनामिकाभ्यां हुं। ॐ ऐं ह्रीं श्रीं ओं पं फं बं भं मं औं कनिष्ठि
काभ्यां वौषट्। ॐ ऐं ह्रीं श्रीं अं यं रं लं वं शं षं सं हं ळं क्षं अः करतलकरपृष्ठाभ्यां फट्। इति करन्यासः। अथ
षडंगन्यासः। ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं॰ आं हृदयाय नमः। ॐ ऐं ह्रीं श्रीं इं चं छं जं झं ञं ईं शिरसे स्वाहा। ॐ ऐं
ह्रीं श्रीं उं टं ठं डं ढं णं ऊं शिखायै वषट्। ॐ ऐं ह्रीं श्रीं एं तं थं दं धं नं ऐं कवचाय हुं। ॐ ऐं ह्रीं श्रीं ओं पं फं बं भं मं औं
नेत्रत्रयाय वौषट्। ॐ ऐं ह्रीं श्रीं अं यं रं लं वं शं षं सं हं ळं क्षं अः अस्त्राय फट्। इति षडंगन्यासः। अथ ध्यानं॥
ॐ पंचाशद्वर्णभेदैर्विहितवदनदोःपादहृत्कुक्षिवक्षो। देशां भास्वत्कपर्दाकलितशशिकलामिंदु
कुंदावदातां। अक्षस्रक्कुंभचिंतालिखितवरकरां त्रीक्षणां पद्मसंस्थां। अच्छाकल्पामतुच्छस्तन।

जघनभरां भारनम्रां नौमि नानमामि ॥ इति ध्यात्वा ॥ दक्षोर्ध्वकरमारभ्य दक्षपादांतं करपर्यंतमायुधयथा
ने ॥ ऒं ऐं ह्रीं श्रीं ह्सौः अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं
णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं ह्सौः श्रीं ह्रीं ऐं ओं नमः ॥ इति मूर्ध्नादिपादांत
व्यापकं विन्यस्य ॥ न्यासं कुर्यात् ॥ ऒं ऐं ह्रीं श्रीं अं नमः शिरसि ॥ ऒं ऐं ह्रीं श्रीं आं नमः मुखवृत्ते ॥ ऒं ऐं
ह्रीं श्रीं इं नमः दक्षनेत्रे ॥ ऒं ऐं ह्रीं श्रीं ईं नमः वामनेत्रे ऒं ऐं ह्रीं श्रीं उं नमः दक्षकर्णे ॥ ऒं ऐं ह्रीं श्रीं ऊं नमः ॥
वामकर्णे ॥ ऒं ऐं ह्रीं श्रीं ऋं नमः दक्षनसि ॥ ऒं ऐं ह्रीं श्रीं ॠं नमः वामनसि ॥ ऒं ऐं ह्रीं श्रीं ऌं नमः दक्षगंडे ॥
ऒं ऐं ह्रीं श्रीं ॡं नमः वामगंडे ॥ ऒं ऐं ह्रीं श्रीं एं नमः ऊर्ध्वोष्ठे ॥ ऒं ऐं ह्रीं श्रीं ऐं नमः अधरे ॥ ऒं ऐं ह्रीं श्रीं ओं नमः
ऊर्ध्वदंतेषु ॥ ऒं ऐं ह्रीं श्रीं औं नमः अधोदंतेषु ॥ ऒं ऐं ह्रीं श्रीं अं नमः ललाटे ॥ ऒं ऐं ह्रीं श्रीं अः नमः जिह्वा
यां ॥ ऒं ऐं ह्रीं श्रीं कं नमः दक्षबाहुमूले ॥ ऒं ऐं ह्रीं श्रीं खं नमः कूर्परे ॥ ऒं ऐं ह्रीं श्रीं गं नमः मणिबंधे ॥ ऒं ऐं
ह्रीं श्रीं घं नमः अंगुलिमूले ॥ ऒं ऐं ह्रीं श्रीं ङं नमः अंगुल्यग्रे ॥ ऒं ऐं ह्रीं श्रीं चं नमः वामबाहुमूले ॥ ऒं ऐं ह्रीं

का॰ पू॰ २२

22

श्रीं छं नमः। कूर्परे॥ ओं ऐं ह्रीं श्रीं जं नमः। मणिबन्धे। ओं ऐं ह्रीं श्रीं झं नमः। अङ्गुलिमूले॥ ओं ऐं ह्रीं श्रीं ञं नमः।
अङ्गुल्यग्रे॥ ओं ऐं ह्रीं श्रीं टं नमः। दक्षपादकन्दे॥ ओं ऐं ह्रीं श्रीं ठं नमः। जानुनि॥ ओं ऐं ह्रीं श्रीं डं नमः। गुल्फे॥
ओं ऐं ह्रीं श्रीं ढं नमः। अङ्गुलिमूले॥ ओं ऐं ह्रीं श्रीं णं नमः। अङ्गुल्यग्रे॥ ओं ऐं ह्रीं श्रीं तं नमः। वामपादकन्दे। ओं
ऐं ह्रीं श्रीं थं नमः। जानुनि॥ ओं ऐं ह्रीं श्रीं दं नमः। गुल्फे ओं ऐं ह्रीं श्रीं धं नमः। अङ्गुलिमूले॥ ओं ऐं ह्रीं श्रीं नं न
मः। अङ्गुल्यग्रे॥ ओं ऐं ह्रीं श्रीं पं नमः। दक्षपार्श्वे॥ ओं ऐं ह्रीं श्रीं फं नमः। वामे। ओं ऐं ह्रीं श्रीं बं नमः। पृष्ठे॥ ओं ऐं ह्रीं श्रीं भं
नमः। नाभौ। ओं ऐं ह्रीं श्रीं मं नमः। जठरे॥ ओं ऐं ह्रीं श्रीं यं त्वगात्मने नमः। हृदि। ओं ऐं ह्रीं श्रीं रं असृगात्मने नमः। द
क्षांसे। ओं ऐं ह्रीं श्रीं लं मांसात्मने नमः। ककुदि॥ ओं ऐं ह्रीं श्रीं वं मेदसात्मने नमः। वामांसे। ओं ऐं ह्रीं श्रीं शं अस्थ्या
त्मने नमः। हृदादिदक्षपाण्यन्तं॥ ओं ऐं ह्रीं श्रीं षं मज्जात्मने नमः। हृदादिवामपाण्यन्तं। ओं ऐं ह्रीं श्रीं सं शुक्रा
त्मने नमः। हृदादिदक्षपादान्तं॥ ओं ऐं ह्रीं श्रीं हं प्राणात्मने नमः। हृदादिवामपादान्तं॥ ओं ऐं ह्रीं श्रीं ळं जीवात्म
ने नमः। पादादिनाभ्यन्तं। ओं ऐं ह्रीं श्रीं क्षं परमात्मने नमः। नाभ्यादिमूर्धान्तं॥ इति बहिर्मातृकान्यासः॥ ॥

अथ श्रीकंठादिमातृकान्यासः ॥ ॐ अस्य श्रीश्रीकंठहरोंदयादिमातृकान्यासस्य | श्रीदक्षिणामू-
र्तिरृषिः गायत्रंछंदः ॥ श्रीअर्धनारीश्वरो देवता | ह्रं बीजं | सः शक्तिः ॥ सोऽहं कीलकं ॥ मम श्रीमंत्रसि-
द्ध्यर्थे न्यासे विनियोगः ॥ इति कृतांजलिः स्वन्यसेत् ॥ श्रीदक्षिणामूर्ति ऋषये नमः शिरसि ॥ गा-
यत्रंछंदसे नमो मुखे ॥ श्रीअर्धनारीश्वरदेवतायै नमः हृदि ॥ ह्रं बीजाय नमः गुह्ये ॥ सः शक्तये नमः पा-
दयोः ॥ सोऽहं कीलकाय नमः नाभौ ॥ मम श्रीमंत्रसिद्ध्यर्थे न्यासे विनियोगः सर्वांगेषु ॥ इति ऋष्यादि ।
न्यासः ॥ अथ करन्यासः ॥ ह्रां अंगुष्ठाभ्यां नमः ॥ ह्रीं तर्जनीभ्यां स्वाहा ॥ ह्रूं मध्यमाभ्यां वषट् ॥ ह्रैं अना-
मिकाभ्यां हुं ह्रौं कनिष्ठिकाभ्यां वौषट् ॥ ह्रः करतलकरपृष्ठाभ्यां फट् ॥ इति करन्यासः ॥ अथ षडंगन्या-
सः ॥ ह्रां हृदयाय नम ॥ ह्रीं शिरसे स्वाहा ॥ ह्रूं शिखायै वषट् ॥ ह्रैं कवचाय हुं ॥ ह्रौं नेत्रत्रयाय वौषट्
ह्रः अस्त्राय फट् ॥ इति षडंगः ॥ अथ ध्यानं ॥ ॐ वंएककांचननिभं रुचिराक्षमालापाशांकुशौ च वर-
दं निजबाहुदंडैः ॥ बिभ्राणमिंदुशकलाभरणं त्रिनेत्रमर्धांबिकेशमनिशं वपुराश्रयामि ॥ इति ध्या-

का० सू०
२३
23

नासमसेग्रह्या ॥ ॐ ऐं ह्रीं श्रीं ह्सौं: अं श्रीकंठाय पूर्णोदर्यै नमः ॥ शिरसि ॥ ॐ ऐं ह्रीं श्रीं ह्सौं: आं अनंते
शाय विरजायै नमः ॥ मुखवृत्ते ॥ ॐ ऐं ह्रीं श्रीं ह्सौं: इं सूक्ष्मेशाय शाल्मल्यै नमः ॥ दक्षनेत्रे ॥ ॐ ऐं ह्रीं
श्रीं ह्सौं: ईं त्रिमूर्तीशाय लोलाक्ष्यै नमः ॥ वामे ॥ ॐ ऐं ह्रीं श्रीं ह्सौं: उं अमरेशाय वर्तुलाक्ष्यै नमः ॥ द
क्षकर्णे ॥ ॐ ऐं ह्रीं श्रीं ह्सौं: ऊं अर्घीशाय दीर्घघोणायै नमः ॥ वामे ॥ ॐ ऐं ह्रीं श्रीं ह्सौं: ऋं भारभूतेशा
य दीर्घमुख्यै नमः ॥ दक्षनसि ॥ ॐ ऐं ह्रीं श्रीं ह्सौं: ॠं तिथीशाय गोमुख्यै नमः ॥ वामे ॥ ॐ ऐं ह्रीं श्रीं ह्सौं:
लृं स्थाणुकेशाय दीर्घजिह्वायै नमः ॥ दक्षगंडे ॥ ॐ ऐं ह्रीं श्रीं ह्सौं: ॡं हरेशाय कुंडोदर्यै नमः ॥ वामे
ॐ ऐं ह्रीं श्रीं ह्सौं: एं फिंटीशाय ऊर्ध्वकेश्यै नमः ॥ ऊर्ध्वोष्ठे ॥ ॐ ऐं ह्रीं श्रीं ह्सौं: ऐं भौतिकेश्वराय वि
कृतमुख्यै नमः ॥ अधरे ॥ ॐ ऐं ह्रीं श्रीं ह्सौं: ओं सद्योजातेशाय ज्वालामुख्यै नमः ॥ ऊर्ध्वदंतेषु ॥ ॐ ऐं
ह्रीं श्रीं ह्सौं: औं अनुग्रहेशाय उल्कामुख्यै नमः ॥ अधोदंतेषु ॥ ॐ ऐं ह्रीं श्रीं ह्सौं: अं अक्रूरेशाय श्री
मुख्यै नमः ॥ ललाटे ॥ ॐ ऐं ह्रीं श्रीं ह्सौं: अः महासेनेशाय विद्यामुख्यै नमः ॥ जिह्वायां ॥ ॐ ऐं ह्रीं श्रीं

ह्स्रौंः कं क्रोधेशाय महाकाल्यै नमः। दक्षबाहुमूले। ॐ ऐं ह्रीं श्रीं ह्स्रौंः खं चण्डेशाय सरस्वत्यै नमः
ऊर्परे। ॐ ऐं ह्रीं श्रीं ह्स्रौंः गं पंचान्तकेशाय सर्वसिद्धिदायै नमः। मणिबंधे। ॐ ऐं ह्रीं श्रीं ह्स्रौंः घं शि
वोत्तमेशाय त्रैलोक्यविद्यायै नमः। अंगुलिमूले। ॐ ऐं ह्रीं श्रीं ह्स्रौंः ङं एकरुद्रेशाय मंत्रशक्त्यै न
मः। अंगुल्यग्रे। ॐ ऐं ह्रीं श्रीं ह्स्रौंः चं कूर्मेशायात्मशक्त्यै नमः। वामबाहुमूले। ॐ ऐं ह्रीं श्रीं ह्स्रौंः छं ए
कनेत्रेशाय भूतमात्रे नमः। ऊर्परे। ॐ ऐं ह्रीं श्रीं ह्स्रौंः जं चतुराननेशाय लंबोदर्यै नमः। मणिबंधे।
ॐ ऐं ह्रीं श्रीं ह्स्रौंः झं अजेशाय द्राविण्यै नमः। अंगुलिमूले। ॐ ऐं ह्रीं श्रीं ह्स्रौंः ञं शर्वेशाय नागर्यै न
मः। अंगुल्यग्रे। ॐ ऐं ह्रीं श्रीं ह्स्रौंः टं सोमेशाय खेचर्यै नमः। दक्षपादकटे। ॐ ऐं ह्रीं श्रीं ह्स्रौंः ठं लांगली।
शाय मंजर्यै नमः। जानुनि। ॐ ऐं ह्रीं श्रीं ह्स्रौंः डं दारुकेशाय रूपिण्यै नमः। गुल्फे। ॐ ऐं ह्रीं श्रीं ह्स्रौंः ढं
अर्धनारीश्वराय वीरिण्यै नमः। अंगुलिमूले। ॐ ऐं ह्रीं श्रीं ह्स्रौंः णं उमाकांतेशाय काकोदर्यै नमः। अं
गुल्यग्रे। ॐ ऐं ह्रीं श्रीं ह्स्रौंः तं आषाढीशाय पूतनायै नमः। वामपादकटे। ॐ ऐं ह्रीं श्रीं ह्स्रौंः थं दंडीशा

का० ए० २४

24

यभद्रकाल्यै नमः॥ जानुनि॥ ॐ ऐं ह्रीं श्रीं ह्सौंः दं दण्डीशाय योगिन्यै नमः॥ गुल्फे॥ ॐ ऐं ह्रीं श्रीं ह्सौंः यं
मीनेशाय शङ्खिन्यै नमः॥ अङ्गुलिमूले॥ ॐ ऐं ह्रीं श्रीं ह्सौंः नं मेषेशाय गर्जिन्यै नमः॥ अङ्गुल्यग्रे॥ ॐ ऐं
ह्रीं श्रीं ह्सौंः पं लोहितेशाय कालरात्र्यै नमः॥ दक्षपार्श्वे॥ ॐ ऐं ह्रीं श्रीं ह्सौंः फं शिखीशाय कुब्जिन्यै न
मः॥ वामे॥ ॐ ऐं ह्रीं श्रीं ह्सौंः बं छगलण्डेशाय कपर्दिन्यै नमः॥ पृष्ठे॥ ॐ ऐं ह्रीं श्रीं ह्सौंः भं द्विरण्डेशाय।
वज्रायै नमः॥ नाभौ॥ ॐ ऐं ह्रीं श्रीं ह्सौंः मं महाकालेशाय जयायै नमः॥ जठरे॥ ॐ ऐं ह्रीं श्रीं ह्सौंः यं त्व
गात्मने वालीशाय सुमुख्यै नमः॥ हृदि॥ ॐ ऐं ह्रीं श्रीं ह्सौंः रं असृगात्मने भुजङ्गेशाय रेवत्यै न।
मः॥ दक्षांसे॥ ॐ ऐं ह्रीं श्रीं ह्सौंः लं मांसात्मने पिनाकेशाय माधव्यै नमः॥ ककुदि॥ ॐ ऐं ह्रीं श्रीं ह्सौंः
वं मेदसात्मने खड्गीशाय वारुण्यै नमः॥ वामांसे॥ ॐ ऐं ह्रीं श्रीं ह्सौंः शं अस्थ्यात्मने बकेशाय
वायव्यै नमः॥ हृदादिदक्षपाण्यन्ते॥ ॐ ऐं ह्रीं श्रीं ह्सौंः षं मज्जात्मने श्वेतेशाय रक्षोविदारि।
ण्यै नमः॥ हृदादिवामपाण्यन्ते॥ ॐ ऐं ह्रीं श्रीं ह्सौंः सं शुक्रात्मने भृग्वीशाय सहजायै नमः॥

हृदादिदक्षपादांतं ॥ ॐ ऐं ह्रीं श्रीं ह्स्नौं : हं प्राणात्मने ऊलेशाय महालक्ष्म्यै नमः ॥ हृदादि
वामपादांतं ॥ ॐ ऐं ह्रीं श्रीं ह्स्नौं : लं शक्त्यात्मने शिवेशाय व्यापिन्यै नमः ॥ पादादिनाभ्यंतं ॥ ॐ ऐं
ह्रीं श्रीं ह्स्नौं : क्षं : परमात्मने संवर्तकेशाय महामायायै नमः ॥ नाभ्यादिमूर्धांतं ॥ इति श्रीकंठादि

मातृकान्यासः

अथ पीठन्यासः ॥ तद्यथा ॥ मूलाधारे ॥ आधारशक्त्यै नमः ॥ स्वाधिष्ठाने ॥ प्रकृत्यै नमः ॥ मणिपूरे ॥
कूर्माय नमः ॥ हृदि ॥ अनंताय नमः ॥ पृथिव्यै नमः ॥ सुधासमुद्राय नमः ॥ मणिद्वीपाय नमः ॥ चिंता
मणिगृहाय नमः ॥ पारिजाताय नमः ॥ तन्मूले ॥ रत्नवेदिकायै नमः ॥ तस्योपरि ॥ मणिपीठाय न
मः ॥ दिक्षु ॥ नानामुनिगणेभ्यो नमः ॥ नानादेवेभ्यो नमः ॥ दक्षांसे ॥ धर्माय नमः ॥ वामांसे ॥ ज्ञानाय न
मः ॥ वामोरौ ॥ वैराग्याय नमः ॥ दक्षोरौ ॥ ऐश्वर्याय नमः ॥ दक्षकटौ ॥ अधर्माय नमः ॥ दक्षपृष्ठे ॥ अज्ञा
नाय नमः ॥ वामपृष्ठे ॥ अवैराग्याय नमः ॥ वामकटौ ॥ अनैश्वर्याय नमः ॥ हृदि ॥ शेषाय नमः ॥ पद्माय

नमः॥प्रकृतिमयपत्रेभ्यो नमः॥विकृतिमयकेसरेभ्यो नमः॥मध्ये॥पंचाशद्वर्णभूषितकर्णि
कायै नमः॥वैश्वानरमंडलाय नमः॥सूर्यमंडलाय नमः॥सोममंडलाय नमः॥सं सत्वाय नमः॥रं
रजसे नमः॥तं तमसे नमः॥अं आत्मने नमः॥अं अंतरात्मने नमः॥पं परमात्मने नमः॥ह्रीं ज्ञाना
य नमः॥अष्टपत्रेषु॥वामायै नमः॥ज्येष्ठायै नमः॥रौद्र्यै नमः॥काल्यै नमः॥कलविकरण्यै नमः॥
बलविकरण्यै नमः॥बलप्रमथन्यै नमः॥सर्वभूतदमन्यै नमः॥मध्ये॥मनोन्मन्यै नमः॥ह्रीं सदा
शिवमहाप्रेतपद्मासनाय नमः॥इति पीठन्यासं विधाय॥पुनः षडंगन्यासं कुर्यात्॥ऐं हृदयाय
नमः॥ह्रीं शिरसे स्वाहा॥क्लीं शिखायै वषट्॥ऐं कवचाय हुं॥ह्रीं नेत्रत्रयाय वौषट्॥क्लीं अस्त्राय
फट्॥इति षडंगं विधाय॥निमीलितनयनः स्वहृदयकमले स्वाभेदेन श्रीकामेश्वरं ध्यायेद्य
था॥ॐ सूर्यकोटिसमानाभं चंद्रमौलिं त्रिलोचनं॥वराभयत्रिशूलासिकरं कामेश्वरं भजे
इति ध्यात्वा॥मानसोपचारैः संपूज्य॥मनसा होमादिकं कुर्याद्यथा॥तत्र॥मूलाधारे॥आ

त्मांनरात्मपरमात्मज्ञानात्मस्वरूपंचतुरस्रंॐ३विभाव्य।तन्मध्येपरमज्ञानाग्निंवि
चिंत्य।मूलंअहंतांजुहोमिस्वाहा।मूलंअस्मत्यंजुहोमिस्वाहा।मूलंपैशुन्यंजुहोमिस्वाहा
मूलंकामंजुहोमिस्वाहा।मूलंक्रोधंजुहोमिस्वाहा।मूलंलोभंजुहोमिस्वाहा।मूलंमदंजु
होमिस्वाहा।मूलमहंकारंजुहोमिस्वाहा।इतिहुत्वाएणाद्वयंदद्याद्यथा।ॐधर्माधर्मह।
विदीप्तेस्वात्माग्नौमनसास्रुचा।सुषुम्णावर्त्मनानित्यमक्षवृत्तीर्जुहोम्यहंस्वाहा।ॐप्रका
शाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचं धर्माधर्मकलास्नेहपूर्णांवह्नौजुहोम्यहंस्वाहा॥
ॐअंतर्निरंतरनिरिंधनमेधमानेमायांधकारपरिपंथिनिसंविदग्नौ।कस्मिंश्चिदद्भुतम
रीचिविकासिकायांविश्वंजुहोमिवसुधादिशिवावसानंस्वाहा।इत्यंतर्यजनंकृत्वा।स्वद
क्षेसामान्यार्घ्यंकुर्याद्यथा।तत्रस्वदक्षे।बिंदुत्रिकोणवृत्तमंडलंविधाय।तत्राधारशक्तिभ्यो
नमः।तत्राधारंसंस्थाप्य।तत्रास्त्रायफडितिशोधितं।नमइतिमंत्रेणपूरितंशंखादिकंपात्रंसं

ॐ ह्रीं हंसः सोहं स्वाहा

गंगे च यमुने चैव गोदावरि सरस्वति
नर्मदे सिंधु कावेरि जलेऽस्मिन् संनिधिं कुरु

स्थाप्य ॥ तत्र ॥ ॐ इति मंत्रेण गंधपुष्पादि निक्षिपेत् ॥ तत्र गंगे चेत्यादि तीर्थान्यावाह्य । धेनुमुद्रां
प्रदर्श्य ॥ सर्वमंत्रेण संपूजयेत् ॥ इति सामान्यार्घ्यं विधाय ॥ स्ववामभागे गंधादिना षट्कोणं ।
तद्गतत्रिकोणवृत्तबिंदुबाह्य ॥ वृत्तचतुरस्रं विलिख्य ॥ सामान्यार्घ्योदकेनैतद्देवमंडलम
भ्युक्ष्य ॥ तत्राधारशक्तिभ्यो नमः ॥ इत्यादिपीठन्यासक्रमेण संपूज्य ॥ नमइत्याधारं प्रक्षाल्य
मंडलोपरि संस्थाप्य ॥ रं वह्निमंडलाय दशकलात्मने नमः ॥ इति प्रपूज्य ॥ फडिति कलशं
प्रक्षाल्य ॥ कारणेन प्रपूर्य ॥ रक्तवस्त्रमाल्यादिना संभूष्य ॥ देवताबुद्ध्या संस्थाप्य ॥ अं अर्कमं
डलाय द्वादशकलात्मने नमः ॥ इति कलशं संस्थाप्य ॥ ॐ चंद्रमंडलाय षोडशकलात्म
नेनमः ॥ इति द्रव्यं संपूज्य ॥ फडिति संरक्ष्य ॥ हूं मित्यवगुंठ्य ॥ मूलेन संवीक्ष्य ॥ नम इत्यभ्युक्ष्य
मूलेन गंधमाघ्राय ॥ ऊं भे पुष्पं दत्वा ॥ पापमोचनं कुर्यात् ॥ एकमेव परं ब्रह्म स्थूलसूक्ष्म
मयं ध्रुवं ॥ कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहं ॥ ॐ वां वीं वूं वैं वौं वः ब्रह्मशापविमोचि

यं धूम्रायै नमः रं नील
वर्णायै नमः लं कपिलायै
नमः वं विस्फुलिंगिन्यै नमः
शं ज्वालायै नमः षं हैमव
त्यै नमः सं कव्यवाहिन्यै
नमः हं हव्यवाहिन्यै नमः
ळं ...ऐ नमः क्षं संकर्षि
ण्यै नमः ॥

कं भं तपिन्यै नमः ॥ खं बं तापिन्यै नमः गं फं धूम्रायै
नमः घं पं मरीच्यै नमः ङं नं ज्वालिन्यै नमः चं धं रुच्यै
नमः छं दं सुषुम्णायै नमः जं थं भोगदायै
झं तं विश्वायै नमः ञं णं बोधिन्यै नमः टं ढं
धारिण्यै नमः ठं डं क्षमायै नमः

अं अमृतायै नमः आं मानदायै नमः इं तुष्ट्यै नमः ईं पुष्ट्यै नमः उं प्रीत्यै नमः ऊं रत्यै नमः ऋं ह्रियै नमः ॠं श्रियै नमः ऌं स्वधायै नमः ॡं रात्र्यै नमः
एं ज्योत्स्नायै नमः ऐं हैमवत्यै नमः ओं छायायै नमः औं पूर्णिमायै नमः अं नित्यायै नमः अः अमावास्यायै नमः

नायै स्वरादेव्यै नमः ॥ इत्यपि त्रिः ॥ सूर्यमंडलसंभूते वरुणालयसंभवे ॥ अमाबीजमये दे
वि शुक्रशापाद्विमुच्यतां ॥ ॐ सां सीं सूं सैं सौं सः शुक्रशापविमोचितायै नमः ॥ इत्यपि त्रिः ॥
वेदानां प्रणवो बीजं ब्रह्मानंदमयो यदि ॥ तेन सत्येन ते देवि ब्रह्महत्या व्यपोहतु ॥ क्रीं श्रीं क्रां
क्रीं क्रूं क्रैं क्रौं क्रः स्वरेकृष्णशापं मोचय ॥ २ अमृतं स्रावय ॥ २ स्वाहा ॥ इत्यपि त्रिः ॥ ॐ हंसः
शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसद् ।
ब्जा गोजा ऋतजा अद्रिजा ऋतं ॥ इत्यपि त्रिः ॥ पावमानः परं ब्रह्म पावमानः परो रसः पावमा
नः परं ज्ञानं तेन त्वां पावयाम्यहं ॥ इत्यपि त्रिः ॥ पठित्वा नंदभैरवं ध्यायेत् ॥ सूर्यकोटिप्रतीका
शं चंद्रकोटिसुशीतलं ॥ अष्टादशभुजं देवं पंचवक्त्रं त्रिलोचनं ॥ अमृतार्णवमध्यस्थं ब्रह्म
पद्मोपरि स्थितं ॥ वृषारूढं नीलकंठं सर्वाभरणभूषितं ॥ कपालखट्वांगधरं घंटाडमरुवादि
नं ॥ पाशांकुशधरं देवं गदामुसलधारिणं ॥ खड्गखेटकपट्टीशमुद्गरशूलकुंतिनं ॥ विचित्र

का. सू. २८

27

खेटकं मुंडं वरदाभयपाणिनं । लोहितं देवदेवेशं भावयेत्साधकोत्तमः । इति ध्यात्वा । ह्स्र
त्म्ल्व्य्ऊं आनंदभैरवाय वौषट् । इति दशधा प्रजप्य । आनंदभैरवांकोपविष्टां सुरादेवीं
ध्यायेद्यथा । भावयेच्च सुरादेवीं चंद्रकोटियुतप्रभां । हिमकुंदेंदुधवलां पंचवक्त्रां त्रिलोचनां
अष्टादशभुजैर्युक्तां सर्वानंदकरोद्यतां । प्रहसंतीं विशालाक्षीं देवदेवस्य संमुखीं । इति ध्या
त्वा । स्ह्स्रत्म्लवर्यूं सुरादेव्यै वौषट् । इति दशधा प्रजप्य । आनंदभैरवभैरव्यौ संपू
ज्य हृद्व्योममध्ये दक्षिणावर्तेन त्रिःपंक्त्या । अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः । कं खं
गं घं ङं । चं छं जं झं ञं टं ठं डं ढं णं तं । थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं । इति शक्तिचा
क्रं विलिख्य । तन्मध्ये लेख्यं । एतत्समावेशाद्व्योममध्येऽमृतं विचिंत्य । येन मुद्रयाऽमृती
कृत्य । वमिति सुधाबीजं मूलमध्ये ष्टयाचटं ष्टत्वा । पठित्वा । आत्मश्रीचक्रयोर्मध्ये त्रि
कोणं षट्कोणाष्टपत्रचतुरस्रं विलिख्य । चतुरस्रे पूर्णगिरिपीठाय नमः । उड्डियानपीठा

यनमः॥ कामरूपपीठाय नमः॥ जालंधरपीठाय नमः॥ इति संपूज्य॥ षट्कोणे षडंगं संपूज्य
मूलं खं द्वयेण त्रिकोणं संपूज्य॥ मध्ये॥ आधारशक्त्यै नमः॥ इति संपूज्य॥ त्रिकोणगर्भे षट्
कोणे भूषितां यंत्रिकां संस्थाप्य॥ नमः इति सामान्यार्घ्यजलेनाभ्युक्ष्य॥ यं धूम्रार्चिषे नमः॥ रं ऊ
ष्मायै नमः॥ लं ज्वलिन्यै नमः॥ वं ज्वालिन्यै नमः॥ शं विस्फुलिंगिन्यै नमः॥ षं सुश्रियै नमः॥ सं
सुरूपायै नमः॥ हं कपिलायै नमः॥ लं हव्यवाहायै नमः॥ क्षं कव्यवाहायै नमः॥ इति संपूज्य॥ रं
वह्निमंडलाय दशकलात्मने नमः॥ इति संपूज्य॥ षट्कोणे षडंगं च संपूज्य॥ मध्ये॥ मूलेन देवं
संपूज्य॥ फडिति पात्रं प्रक्षाल्य॥ ॐ ब्लां ड चषकाय नारिकेलाय स्वाहा॥ इति नारिकेलपात्रं प्र
क्षाल्य॥ ॐ ऐं ह्रीं श्रीं श्रीकामेश्वरपात्रं संस्थापयामि नमः॥ इति संस्थाप्य॥ कं भं तपिन्यै नमः॥
खं बं तापिन्यै नमः॥ गं फं धूम्रायै नमः॥ घं पं मरीच्यै नमः॥ ङं नं ज्वलिन्यै नमः॥ चं धं रुच्यै नमः॥
छं दं सुषुम्णायै नमः॥ जं थं भोगदायै नमः॥ झं तं विश्वायै नमः॥ ञं णं बोधिन्यै नमः॥ टं ढं धा

का. पू. २८

विण्यै नमः ॥ ठं डं दत्तमायै नमः ॥ इति ॥ अं अर्कमंडलाय द्वादशकलात्मने नमः ॥ इति संपूज्य तन्म
ध्ये ॥ त्रिकोणषट्कोणवृत्तपात्रे विलिख्य ॥ समस्तव्यस्तमंत्रेण संपूज्य ॥ वमिति वरुणबीजं ॥ क्षः
लं हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं
ऐं एं ॡं ऌं ॠं ऋं ऊं उं ईं इं आं अं इति विलोममातृकापठनं ॥ अमृतेनेन त्रिकोणं प्रपूर्य ॥ जलेन
भागमेकं प्रपूर्य ॥ तत्र स्वगंगादीनि निक्षिप्य ॥ अं अमृतायै नमः ॥ आं मानदायै नमः ॥ इं पूषायै नमः ॥
ईं तुष्ट्यै नमः ॥ उं पुष्ट्यै नमः ॥ ऊं रत्यै नमः ॥ ऋं धृत्यै नमः ॥ ॠं शशिन्यै नमः ॥ ऌं चंद्रिकायै नमः ॥ ॡं
कान्त्यै नमः ॥ एं ज्योत्स्नायै नमः ॥ ऐं श्रियै नमः ॥ ओं प्रीत्यै नमः ॥ औं अंगदायै नमः ॥ अं पूर्णायै नमः ॥ अः पू
र्णामृतायै नमः ॥ इति षोडशकलात्मने सोममंडलाय नमः ॥ इति संपूज्य पूर्ववद्यंत्रद्वये विलि
ख्य ॥ त्रिकोणत्रिरेखायां ॥ अं ॥ १६ ॥ कं ॥ १६ ॥ थं ॥ १६ ॥ इति त्रिविलिख्य ॥ हंसं ॥ खड्गत्रयेण त्रिकोणं संपूज्य ॥
षट्कोणे षडंगं च ॥ गंगे चेत्यादिना तीर्थमावाह्य ॥ आनंदभैरवभैरव्यौ ध्यात्वा ॥ स्वस्वमंत्रेण संपूज्य

28

सर्वादित्तः ॥ ह्रूं गगनरत्नेभ्यो नमः ॥ स्लूं स्वर्गरत्नेभ्यो नमः ॥ झ्रूं पातालरत्नेभ्यो नमः ॥ ङ्रूं मर्त्यरत्ने
भ्यो नमः ॥ मध्ये ॥ न्लूं नागरत्नेभ्यो नमः ॥ इति संपूज्य ॥ द्वितीयां शोधयेत् ॥ तत्र त्रिकोणवृत्तं मण्डलं वि
लिख्य ॥ तदुपरि ॥ तानि पात्राणि संस्थाप्य ॥ यमिति संशोध्य ॥ रमिति संदह्य ॥ वं इत्याप्लाव्य ॥ तदुपरि ।
मूलं दशधा जप्त्वा ॥ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ॥ यस्योरुषु त्रिषु विक्रम
णेष्वधिक्षियन्ति भुवनानि विश्वा ॥ इति द्वितीयाशुद्धिः ॥ ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनं ॥ उ
र्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ इति मीनं संशोध्य ॥ ॐ तद्विष्णोः परमं पदं सदा पश्य
न्ति सूरयः ॥ दिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत्परमं पदम् ॥
इति मुद्राः शोधयेत् ॥ ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ॥ आसिंचतु प्रजापतिर्धाता
गर्भं दधातु ते ॥ गर्भं देहि सिनीवालि गर्भं देहि सरस्वति गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ
इति ऊं डगोलादिं शोधयेत् ॥ हमिति अवगुण्ठ्य ॥ तालत्रयेण दिशः संरक्ष्य ॥ तत्र देवमावाह्य ॥ ध्येवं ।

ध्यामृतीकृत्य। योनिं प्रदर्श्य। कुंडलिन्याः प्रयोगेन निःसृतामृतवृष्टिं योनिमुद्रोल्लासितकरेण
तत्रानीय। मूलांते। ब्रह्मांडखंडसंभूतमशेषरससंनिर्भरं। आपूरितमहापात्रं पीयूषरसमावह। इत्य
भिमंत्र्य। ऐं अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतमावह २। ॐ जूं सः स्वाहा। इत्यभिमंत्र्य
सौः तद्रूपेण एकरस्यं च दत्वा ध्यें चित्स्वरूपिणि। अस्तापराम्तताकारं मयि विस्फुरणं कुरु। इत्यभिसं
धाय। सौः नम इति संस्पृश्य। शंखमुद्रां प्रदर्श्य। षडंगेन सकलीकृत्य। मत्स्यमुद्रया पात्रमाच्छाद्य। पात्रं दे
वीरूपं भावयेत्। इति विशेषार्घ्यस्थापनविधिः। ततस्तत्परतस्तेनैव विधिना श्रीपात्रं स्थापयेत्।
तेनैव मूलदेवव्यतिरिक्तावरणदेवतास्तर्पयेत्। पूजासमर्पणादिकं। मूलदेवतर्पणं च विशेषार्घ्ये
णैव। तत्रोपयोगपर्यंतमावरणपूजासमर्पणमर्घ्यदानं सामान्यार्घ्यजलेनैव कुर्यात्। इति श्रीपात्र
स्थापनविधिः। ततो देवाज्ञामादाय घटसमीपे। गुरुपात्रं। शक्तिपात्रं। स्वपात्रं। योगिनीपात्रं। वीरपा
त्रं। भोगपात्रं। बलिपात्रं। पाद्यपात्रं। अर्घ्यपात्रं। घृतदधिमधुसहितं मधुपर्कपात्रं। आचमनीयपात्रं।

29

प्रोक्षणीयपात्रं संस्थाप्य । ततश्च श्रवणोत्पन्नकारणेन तत्त्वमुद्रया श्रीपात्राद्बिंदुं समुद्धृत्य । स्वहृदि । हस
क्षमलवरयऊं श्रीकामेश्वरं तर्पयामि नमः । इति त्रिः संतर्पयेत् । हसक्षमलवरयऊं स्हरादेवीं तर्पया
मि नमः । इति त्रिः संतर्प्य । स्वशिरसि गुरुपादुकामंत्रेण गुरुपात्रविंदुभिः श्रीमत्क्लीं अमुकानंदनाथश्री
गुरुं तर्पयामि नमः । इति त्रिर्गुरूंस्संतर्प्य परमगुरुपरमेष्ठिगुरुपरमाचार्यादीन्संतर्पयेत् । ततः श्रीपा
त्रविंदुभिः स्वहृदि । मूलं श्रीशक्तिसहितश्रीकामेश्वरं सपरिवारं सवाहनं सायुधं तर्पयामि नमः ।
इति त्रिः संतर्प्य । प्रोक्षणीपात्रं । श्रीपात्रविंदुभिः संपूर्य । तेनैव । मूलं आत्मतत्त्वात्मने नमः । मूलं वि
द्यातत्त्वात्मने नमः । मूलं सशिवतत्त्वात्मने नमः । मूलं सर्वतत्त्वात्मने नमः । इति स्वात्मानं संप्रोक्ष्य । पूजो
पकरणानि संप्रोक्षयेत् । इति कलशस्थापनविधिः । अथात्मपूजा । पुरतस्त्रिकोणमंडलस्य द्वारे पा
त्रं संस्थाप्य । कलशोदकेनापूर्य । विशेषार्घ्यविंदुं दत्वा । स्वदेहं गंधादिनालंकृत्य । आत्मानं देवरूपं ।
भावयन् । श्रीगुरुगणेशपरदेवताः प्रणम्य । मूलादिब्रह्मरंध्रांतं कुंडलिनीं विसतंतुतनीयसीं चंद्र

का. सू. १. कोटिप्रभाद्वंवामनोलयपर्यंतंध्यात्वा। परानंदनिर्भरः॥ तदात्मकत्वेन मूलविद्यामपि॥ मूलादिब्र
ह्मरंध्रांतं तेजोमयीं विभाव्य॥ तत्तेजसापरिणतं स्वेष्टदेवतारूपं स्वदेहं भावयन्॥ आत्मपूजां कुर्यात्॥
अथ चक्रः समयपूजा॥ नवविंदुचक्रपद्मे॥ मूलदेव्यग्रे॥ ॐ ऐं क्लीं सौः॥ ॐ नमः कामेश्वरि इच्छाकामफलप्र
30 दे सर्ववशंकरि॥ सकलजगत्क्षोभकरि ह्रूं ह्रूं द्रां द्रीं क्लीं ब्लूं सः सौः क्लीं ऐं कामेश्वरसमयदेवताश्रीपा
दुकां पूजयामि तर्पयामि नमः॥ श्रीदेव्या वामे ऐं क्रीं वज्रकायार्थसाधनि वज्रेश्वरि वज्रदेव वज्रपंज
रमध्यगे ह्रीं क्लिन्ने ऐं क्रों नित्यमदद्रवे ह्रीं वज्रनित्यायै नमः॥ वज्रेश्वरीसमयदेवताश्रीपादुकां पूज
यामि तर्पयामि नमः॥ तद्दक्षे॥ आं ऐं भगभगे भगिनि भगोदरि भगमाले भगावहे भगगुह्ये भग।
योनि भगनिपातिनि सर्वभगवशंकरि भगरूपे नित्यक्लिन्ने मदद्रवे भगस्वरूपे सर्वाणि भगानि मे
वशमानय वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय॥ अमोघे भगमविच्चे क्षुभ क्षोभय स
र्वसत्त्वान्भगेश्वरि॥ ऐं ब्लूं जं ब्लूं भं ब्लूं सौः ब्लूं हें ब्लूं नित्यक्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रीं ह्रूं ब्लूं।

ह्रीं श्रां भगमालिनि समयदेवता श्रीपादुकां पूजयामि तर्पयामि नमः॥ इति त्रयं पूजयित्वा।
श्रीपात्रामृतेन संतर्प्य॥ मध्ये मूलदेवामेव॥ ऐं॥ ह्रीं भगवति ह्रूं नित्यकामेश्वरि ह्रीं सर्वसत्ववशं
करि सः त्रिपुरभैरवि ऐं विच्चे ह्रीं महात्रिपुरसुंदर्यै नमः॥ श्रीमहात्रिपुरसुंदरी समयदेवता श्री
पादुकां पूजयामि तर्पयामि नमः॥ इति संपूज्य॥ विशेषार्घ्यामृतेन संतर्प्य ह्रीं इति शक्त्यापा
नमुद्रां बद्ध्वा॥ मूलेन प्रदर्श्य॥ ह्रमिति मुद्रां चेत्॥ इति चतुःसमयपूजा॥ अथाम्नायपूजा॥ तत्र चतुर
स्रे॥ त्रैलोक्यमोहन सर्वाशापूरक सर्वसंक्षोभकारात्मके सृष्टिचक्रे॥ स्त्रीं स्त्रीं पूर्वाम्नायदेवता
उन्मनी देवी श्रीपादुकां पूजयामि तर्पयामि नमः॥ ततः चतुर्दशारद्विदशारात्मके स्थिति
चक्रे॥ ऐं क्लिन्ने ह्रीं मदद्रवे कुले स्त्रौं दक्षिणाम्नायसमयविद्या भोगिनी देवी श्रीपादुकां पू
जयामि तर्पयामि नमः॥ ततोष्टारत्रिकोणबिंद्वात्मके संहारचक्रे स्त्रौं ह्सक्रां स्त्रौं नमो भ
गवति ह्सप्रें कुब्जिकायै ह्रां ह्रीं॥ अघोरे घोरे अघोरमुखि छिंछिं किणि किणि विच्चे स्त्रौं॥

का॰
प॰
३१
31

हसखैं श्रीं ह्रीं पश्चिमाम्नायदेवता कुब्जिका श्रीपादुकां पूजयामि तर्पयामि नमः । ततः समष्टि
चक्रे । ॐ हसखफ्रें महाचण्डयोगेश्वरि उत्तराम्नायादिदेवता कालीदेवी श्रीपादुकां पूजयामि
तर्पयामि नमः ततो मूलदेवीमेव प्रथमं संपूज्य संतर्प्य । ततो रक्तवर्णां अन्नपूर्णां ध्यात्वा स्वव
र्णदेवीं स्वर्णपात्रं दयानां त्रिनेत्रां चन्द्रचूडां च । ॐ ह्रीं सौः श्रीं क्लीं ॐ नमो भगवति अन्नपूर्णे अन्नं
देहि २ स्वाहा । अन्नपूर्णा सुन्दरी श्रीपादुकां पूजयामि तर्पयामि नमः । इति संपूज्य । विशेषार्घ्या
मृतेन संतर्प्य । मूलेन मूलदेवीं संपूज्य संतर्प्य । मूलदेव्युत्तराम्नायदेवता सौः अनुत्तरायदेवता
रूपां वा श्रीपादुकां पूजयामि तर्पयामि नमः । इति संपूज्य । विशेषार्घ्यामृतेन संतर्प्य । मूलदेवीय
योक्तरूपां ध्यात्वा । मूलेन संपूज्य तर्पयेत् । इत्याम्नायपूजा । श्रीकामेश्वरं ध्यात्वा । पीठोपरि पी
ठपूजां कुर्यात् । तत्रादौ स्ववामे गुरुमंत्रेण गुरुपूजां कुर्यात् । स्वदक्षे गं गणपतये नमः । इति ग
णेशं संपूज्य । पीठपूजां कृत्वा । तत्र श्रीचक्रं संस्थाप्य । अथवा श्रीचक्रोपरि पीठपूजां विधाय

मूलंपठित्वा।श्रीकामेश्वरमूर्तिंपरिकल्प्य।पुष्पांजलिंगृहीत्वा।वमितिवामनासापुटेनस्वहृद
यातेजोरूपांस्वेष्टदेवतांतत्रानीय।देवेशभक्तिसुलभपरिवारसमन्वित।यावत्त्वांपूजयिष्यामि
तावद्देवइहावह।इतिपठित्वा।कुसुमांजलिंश्रीचक्रोपरिनिक्षिपेत्।मूलंश्रीशक्तिसहितंश्री
कामेश्वरइहागच्छ।१इहसंतिष्ठ।२सन्निधेहि।३मूलंश्रीशक्तिसहितश्रीकामेश्वरसन्निरुद्धो
भव।४ममसर्वोपसहितांपूजांगृहाण।५स्वाहा।इमावाहनादिमुद्राःप्रदर्श्य।प्राणप्रतिष्ठांचक्रोपरि
लेलिहानमुद्रयाकुर्याद्यथा।ॐआंह्रींक्रोंयंरंलंवंशंषंसंहंलंक्षंहंसःसोहंश्रीकामेश्वरप्राणाइ
हप्राणाः।ॐआंह्रींक्रोंयंरंलंवंशंषंसंहंलंक्षंहंसःसोहंश्रीकामेश्वरजीवइहस्थितः।ॐआंह्रीं
क्रोंयंरंलंवंशंषंसंहंलंक्षंहंसःसोहंश्रीकामेश्वरसर्वेंद्रियाणिइहस्थितानि।ॐआंह्रींक्रोंयंरंलं
वंशंषंसंहंलंक्षंहंसःसोहंश्रीकामेश्वरवाङ्मनस्त्वक्चक्षुःश्रोत्रघ्राणप्राणाइहागत्यसुखंचिरं
तिष्ठंतुस्वाहा।इतिप्राणप्रतिष्ठांविधाय।छोटिकाभिर्दशदिग्बंधनंकृत्वाऽवगुंठ्यसुमनोहम

का० पू० ३२ सकलीकृत्य॥परमीकृत्य॥धेनुयोनिं प्रदर्श्य॥वराभयत्रिशूलासिकरं मुद्राः प्रदर्श्य॥पुनः श्रीपात्रा
मृतेन सायुधां सवाहनां सपरिकरां सावरणां श्रीकामेश्वरभगवन्तर्पयामि नमः॥इति त्रिः संत
र्प्य॥मूलं एतदासनं श्रीकामेश्वरभगवन्नासनउपविशनामित्यासनउपविष्टं भावयेत्॥मूलं ए
तत्पाद्यं श्रीकामेश्वरभगवन् इति पाद्यपात्रेण पादयोः पाद्यं दद्यात्॥पुनर्मूलं॥एतदर्घ्यं श्रीकामे
श्वरभगवन् इदमर्घ्यपात्रेण शिरसि अर्घ्यं दद्यात्॥मूलं एतदाचमनीयं श्रीकामेश्वरभगवन् स्वधा
इत्याचमनीयपात्रेण मुखे आचमनीयं दद्यात्॥मूलं एतन्मधुपर्कं श्रीकामेश्वरभगवन् स्वधा इति
मधुपर्कपात्रेण मुखे मधुपर्कं दद्यात्॥मूलं एतदाचमनीयं श्रीकामेश्वरभगवन् स्वाहा॥इति पुन
राचमनीयपात्रेण मुखे आचमनीयं दद्यात्॥ततः स्नानमंडपं नीत्वा॥ततः पीठोपरि संस्थाप्य॥तत्रा
सनादिभिः संपूज्य॥ततो गंगादितीर्थोदकसंमिश्रितक्षीरादिभिः मूलं एतत्स्नानीयं श्रीकामे
श्वरभगवन्नमः॥इति सर्वांगेषु स्नानीयं दद्यात्॥इति संस्नाप्य॥मृदुदुशलेनांगं प्रोच्य॥कालागुरु

32

रूपेण केशान्संशोध्यालंकारमंडपं नीत्वा ॥ तत्र विचित्रपट्टवस्त्रकुंकुमकस्तूरीचंदनसिंदूर
मुकुटकुंडलहारनूपुरादिनूपुरमंजीरदर्पणादिनानालंकारान्दत्वा ॥ पुनराचमनीयं दद्यात् ॥ ततः
स्नानमंडपं समानीय ॥ तत्र पुनः पाद्यादिमधुपर्कांतं संपूज्य मूलमध्यानामांगुष्ठाग्रैः श्रीकामेश्वर
भगवन्नयं गंधो नमः ॥ इति तिलकं कुर्यात् ॥ ततोंगुष्ठतर्जनीभ्यां मूले श्रीकामेश्वर भगवन्नेतान्य
तत पुष्पाणि वौषट् ॥ इति पुष्पैः संपूज्य ॥ ततो धूपपात्रं अस्त्राय फट् ॥ इति सामान्यार्घ्योदकेन संप्रोक्ष्य
पुरतः संस्थापयित्वा वामतर्जन्यां संस्पृशन् ॥ श्रीपात्राम्लेतेन धूपं निवेदयामीति निवेद्य ॥ घंटां जगद्ध्व
निमंत्रमातः स्वाहेति घंटां संपूज्य ॥ वामेन पाणिना तां वादयन् ॥ मध्यमानामांगुष्ठैर्धूपं धृत्वा ॥ मूलका
मेश्वराय विद्महे ॥ शक्तीश्वराय धीमहि ॥ तन्नः आत्मा प्रचोदयात् ॥ इति गायत्रीमूलमंत्रं च पठन् ॥ व
नस्पतिरसोत्पन्नो गंधाढ्यो गंधमुत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां ॥ इति त्रिधा तोल्य
देवं धूपयेत् ॥ ततो दीपं संमुखे संस्थाप्य ॥ एवं वत्योत्तरणरजनेन कृत्वा ॥ वाममध्यमया दीपपात्रं सं

का॰
ह॰
३३

33

स्पृशन् । दीपं निवेदयामीति श्रीपात्रामृतेन निवेद्य । एवं घण्टां वादयन् । मध्यानामामध्ये दीप
मङ्गुष्ठेन धृत्वा दर्शयन् एवं च गायत्रीं मूलं च पठन् । स्वप्रकाशो महादीपः सर्वतस्तिमिरापः
हः । सबाह्याभ्यन्तरं ज्योतिर्दीपोयं प्रतिगृह्यतां । इति दीपं दद्यात् । ततः स्वर्णादिपात्रे ऊं ऊं मे नव
रूपं च दद्रूपं च कृत्वा । मध्ये दीपमेकमष्टपत्रेषु दीपाष्टकं संस्थाप्य । मूलमन्त्रेण प्रज्वाल्य । श्री
सौः स्रूं स्लूं स्लूं स्रूं स्लूं सौः श्रीरत्नेश्वर्यै नमः । इत्यभ्यर्च्य । मूलेन चाभ्यर्च्य । स्थालकं मस्तकान्तमुद्धृत्य
नववारं मूलं च पठित्वा । गायत्रीं च पठित्वा । समस्तचक्रचक्रेशीयुते देव नवात्मकं । आरात्रिकमिदं
देव गृहाण मम सिद्धये । इति चक्रमुद्रया नीराजयेत् ततो नानानैवेद्यं स्वर्णादिपात्रे निक्षिप्य । नम
इत्यमुद्रया । ऋमित्यवगुण्ठ्य । धेनुमुद्रयाऽमृतीकृत्य । मूलेन सप्तधा जप्त्वा । वामाङ्गुष्ठेन नैवेद्यपात्रं स्पृ
शन् । मूलान्ते । हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतं । पञ्चधा षड्रसोपेतं गृहाण परमेश्वर । मूलं
श्रीकामेश्वरसहितायै सावरणायै सवाहनायै सायुधायै सपरिकरायै नैवेद्यं निवेदयामीति

दत्तनामांगुष्ठाभ्यामुत्सृजेत् ॥ ततः मूलं पठन् तदाचमनीयं श्रीकामेश्वरं स्वधा ॥ इति दत्त्वा ॥ ग्रासमुद्राः
प्रदर्शयेद्यथा ॥ ॐ प्राणाय स्वाहा ॥ दत्तांगुष्ठकनिष्ठकानामाभिः ॐ अपानाय स्वाहा ॥ दत्तांगुष्ठतर्ज-
नीमध्यमाभिः ॥ ॐ समानाय स्वाहा ॥ दत्तांगुष्ठमध्यमानामाभिः ॥ ॐ उदानाय स्वाहा ॥ दत्तांगुष्ठतर्जनीम-
ध्यमानामाभिः ॥ ॐ व्यानाय स्वाहा ॥ सर्वांगुलीभिः प्रतिप्रदर्श्य ॥ पुनराचमनीयं दत्त्वा ॥ मूलांते श्रीकामे-
श्वरकर्पूरादियुक्तं ताम्बूलं निवेदयामि नमः ॥ इति दद्यात् ॥ सर्वेषामर्घ्यपात्रजलेनोत्सर्गः कार्यः ॥ ततः
तत्त्वमुद्रया श्रीपादाम्बुजेन मूलं श्रीकामेश्वरं साङ्गं सपरिकरं सवाहनं सावरणं तर्पयामि नमः ॥
इति त्रिः संतर्प्य ॥ पूर्वोक्तमुद्राः प्रदर्श्य ॥ योनिं हृदि क्षोभिणीं ॥ मुखे द्राविणीं ॥ भ्रूमध्ये आकर्षिणीं ॥ लला-
टे वशिनीं ॥ ब्रह्मरंध्रे आह्लादिनीं ॥ पंचमुद्रामयीं प्रदर्श्य कृतांजलिः ॥ श्रीमच्छ्रीकामेश्वर भगवन् आ-
वरणं ते पूजयामि नमः ॥ इत्याज्ञां गृहीत्वा आवरणपूजामारभेद्यथा ॥ तत्र गुरुपंक्तित्रयं विभाव्य पू-
जयेत् ॥ दिव्यौघेभ्यो गुरुभ्यः ॥ सिद्धौघेभ्यो गुरुभ्यः ॥ मानवौघेभ्यो गुरुभ्यः ॥ ततः ॥ ॐ ऐं ह्रीं श्रीं आज्ञा

का॰
स॰
२४
34

देवानंदनाथश्रीपादुकांपूजयामिनमः तर्पयामिनमः॥ ॐ ऐं ह्रीं श्रीं शिवानंदमणिरामवा।
जपेयानंदनाथश्रीपादुकांपूजयामिनमः तर्पयामिनमः॥ ॐ ऐं ह्रीं श्रीं ज्ञानानंदनाथश्रीपादुकां
पूजयामिनमः तर्पयामिनमः॥ ॐ ऐं ह्रीं श्रीं श्रीसाहिबकौलानंदनाथश्रीदेव्यंबाश्रीपादुकांपूजा।
यामिनमः तर्पयामिनमः॥ ॐ ऐं ह्रीं श्रीं ज्योतिप्रकाशकौलानंदनाथश्रीभगवत्यंबाश्रीपादुकांपू
जयामिनमः तर्पयामिनमः॥ ॐ ऐं ह्रीं श्रीं गोविंदकौलानंदनाथश्रीशारदांबाश्रीपादुकांपूजया
मिनमः तर्पयामिनमः॥ ॐ ऐं ह्रीं श्रीं महानंदकौलानंदनाथश्रीभाग्यवत्यंबाश्रीपादुकांपूजयामिन
मः तर्पयामिनमः॥ ॐ ऐं ह्रीं श्रीं स्वामिप्रतापकौलानंदनाथश्रीदयावत्यंबाश्रीपा डुकांपूजया।
मिनमः तर्पयामिनमः॥ ततः दशलोकपालान्पूजयेद्यथा॥ लं इंद्रायवज्रहस्तायनमः॥ रं अग्नये
शक्तिहस्तायनमः॥ दं यमायदंडहस्तायनमः॥ क्षं नैर्ऋतयेखड्गहस्तायनमः॥ हं ईशानायत्रिशू
लहस्तायनमः॥ कुं कुबेरायगदाहस्तायनमः॥ वं वरुणायपाशहस्तायनमः॥ वां वायवेध्वज

ह्स्लायनमः ह्रौं अनंताय हलह्स्लायनमः अंब्रां ल्ऐं पद्मह्स्लायनमः॥ ततो मूलेन देवं
समस्तपसंतर्प्य पंचमिति योनिमुद्रया प्रणमेत्॥ इति प्रथमावरणं षोडशदेवताः पश्चिमादिषु
दक्षिणावर्तेन पूजयेद्यथा॥ ऐं ह्रीं सौंः सर्वाशापरिपूरकचक्राय नमः इति पुष्पांजलिं दत्वा॥
ऐं ह्रीं सौंः अं कामाकर्षिणी श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः आं बुद्ध्याकर्षिणी ३८
श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः इं अहंकाराकर्षिणी श्रीपादुकां पूजयामि नमः
तर्पयामि नमः॥ ऐं ह्रीं सौंः ईं शब्दाकर्षिणी श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः उं स्प
र्शाकर्षिणी श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः ऊं रूपाकर्षिणी श्रीपादुकां पूज
यामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः ऋं रसाकर्षिणी श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥
ऐं ह्रीं सौंः ॠं गंधाकर्षिणी श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः ऌं चित्ताकर्षिणी
श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः ॡं धैर्याकर्षिणी श्रीपादुकां पूजयामि नमः।

का॰ पू॰ ३५ 35

तर्पयामि नमः॥ ऐं ह्रीं सौः एं स्मृत्याकर्षिणी श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौः
ऐं नामाकर्षिणी श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौः ओं बीजाकर्षिणी श्रीपादुकां पू-
जयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौः औं आत्माकर्षिणी श्रीपादुकां पूजयामि नमः तर्पयामि न-
मः॥ ऐं ह्रीं सौः अं अमृताकर्षिणी श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौः अः शरीरा-
कर्षिणी श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ इति संपूज्य संतर्प्य॥ मूलेन मूलदेवं संतर्प्य॥
येमिति योनिमुद्रया प्रणमेत्॥ द्वितीयावरणं॥ अथाष्टदले॥ ऐं ह्रीं सौः सर्वसंक्षोभककारकच-
क्रायनमः॥ इति पुष्पाञ्जलिं दत्वा॥ ऐं ह्रीं सौः कं खं गं घं ङं असितांगभैरवश्रीपादुकां पूजयामि न-
मः तर्पयामि नमः॥ ऐं ह्रीं सौः चं छं जं झं ञं रुरुभैरवश्रीपादुकां पूजयामि नमः तर्पयामि नमः॥
ऐं ह्रीं सौः टं ठं डं ढं णं चण्डभैरवश्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौः तं थं दं धं नं
क्रोधभैरवश्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौः पं फं बं भं मं उन्मत्तभैरवश्री।

पादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः यं रं लं वं कपालेशभैरव श्रीपादुकां पूजया
मि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः शं षं सं हं भीषणभैरव श्रीपादुकां पूजयामि नमः तर्पयामि
नमः॥ ऐं ह्रीं सौंः लं क्षं संहारभैरव श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ इति संपूज्य संत
र्प्य॥ मूलेन मूलदेवं संपूज्य संतर्प्य॥ ऐं मित्तियोनिमुद्रया प्रणमेत्॥ तृतीयावरणम्॥ अथ चतु
र्दशारचक्रे॥ पश्चिमादिदक्षिणावर्तेन पूजयेत्॥ ऐं ह्रीं सौंः सर्वसौभाग्यदायकचक्राय नमः इति
पुष्पांजलिं दत्वा॥ ऐं ह्रीं सौंः सर्वक्षोभण श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः
सर्वविद्रावण श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः सर्वाकर्षण श्रीपादुकां पूज
यामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः सर्वाह्लादनकारण श्रीपादुकां पूजयामि नमः तर्पया
मि नमः॥ ऐं ह्रीं सौंः सर्वसंमोहन श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः सर्वस्तं
भनकारण श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः सर्वजृंभण श्रीपादुकां पूज।

का॰
सू॰
३६

36

यामिनमः तर्पयामिनमः॥ ऐं क्लीं सौंः सर्ववशंकरणश्रीपादुकां पूजयामिनमः तर्पयामिनमः॥
ऐं क्लीं सौंः सर्वरंजनश्रीपादुकां पूजयामिनमः तर्पयामिनमः॥ ऐं क्लीं सौंः सर्वोन्मादनश्रीपा
दुकां पूजयामिनमः तर्पयामिनमः॥ ऐं क्लीं सौंः सर्वार्थसाधनश्रीपादुकां पूजयामिनमः तर्प
यामिनमः॥ ऐं क्लीं सौंः सर्वसंपत्तरणश्रीपादुकां पूजयामिनमः तर्पयामिनमः॥ ऐं क्लीं सौंः स
र्वमंत्रमयश्रीपादुकां पूजयामिनमः तर्पयामिनमः॥ ऐं क्लीं सौंः सर्वद्वंद्वक्षयंकरश्रीपादुकां पू
जयामिनमः तर्पयामिनमः॥ इति संपूज्य संतर्प्य॥ मूलेन मूलदेवं संपूज्य संतर्प्य ऐमिति योनिमु
द्रया प्रणमेत्॥ चतुर्थावरणम्॥ अथ बहिर्दशारचक्रे॥ पश्चिमादिदक्षिणावर्तेन पूजयेत्॥ ऐं
क्लीं सौंः सर्वार्थसाधकचक्रायनमः॥ इति पुष्पांजलिं दत्वा॥ ऐं क्लीं सौंः सर्वसिद्धिप्रदेदेव श्री
पादुकां पूजयामिनमः तर्पयामिनमः॥ ऐं क्लीं सौंः सर्वसंपत्प्रदेदेव श्रीपादुकां पूजयामिनमः
तर्पयामिनमः॥ ऐं क्लीं सौंः सर्वप्रियंकरदेव श्रीपादुकां पूजयामिनमः तर्पयामिनमः ऐं क्लीं सौंः

सर्वमंगलकारणदेवश्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः सर्वकामप्रदेदेव
श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः सर्वदुःखविमोचनेदेवश्रीपादुकां पूज
यामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः सर्वमृत्युप्रशमनेदेवश्रीपादुकां पूजयामि नमः तर्पयामि
नमः॥ ऐं ह्रीं सौंः सर्वविघ्ननिवारणदेवश्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः स
र्वांगसुंदरदेवश्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः सर्वसौभाग्यदायकदेव।
श्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ इति संपूज्य संतर्प्य॥ मूलेन मूलदेवं संपूज्य संतर्प्य॥ ऐ
मिति योनिमुद्रया प्रणमेत्॥ पंचमावरणम्॥ अथांतर्दशारचक्रे॥ पश्चिमादिदक्षिणावर्तेन पूज
येत्॥ ऐं ह्रीं सौंः सर्वरक्षाकरचक्राय नमः॥ इति पुष्पांजलिं दत्वा॥ ऐं ह्रीं सौंः सर्वज्ञदेवश्रीपादु
कां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः सर्वशक्तिदेवश्रीपादुकां पूजयामि नमः तर्पयामि
नमः॥ ऐं ह्रीं सौंः सर्वैश्वर्यप्रदेदेवश्रीपादुकां पूजयामि नमः तर्पयामि नमः॥ ऐं ह्रीं सौंः सर्वज्ञान

का० पू० ३७

मयदेवश्रीपादुकांपूजयामिनमः तर्पयामिनमः॥ ऐंह्रींश्रीं सर्वव्याधिविनाशनदेवश्रीपादु
कांपूजयामिनमः तर्पयामिनमः॥ ऐंह्रींश्रीं सर्वाधारस्वरूपदेवश्रीपादुकांपूजयामिनमः तर्प
यामिनमः॥ ऐंह्रींश्रीं सर्वपापहरदेवश्रीपादुकांपूजयामिनमः तर्पयामिनमः॥ ऐंह्रींश्रीं स
र्वानंदमयदेवश्रीपादुकांपूजयामिनमः तर्पयामिनमः॥ ऐंह्रींश्रीं सर्वरक्षास्वरूपिणदेवश्री
पादुकांपूजयामिनमः तर्पयामिनमः॥ ऐंह्रींश्रीं सर्वेप्सितफलप्रददेवश्रीपादुकांपूजया
मिनमः तर्पयामिनमः॥ इतिसंपूज्यसंतर्प्य॥ मूलेनमूलदेवंसंपूज्यसंतर्प्य॥ ऐमितियोनिमुद्र
याप्रणमेत्॥ षष्टावरणम्॥ इत्येतच्चक्रत्रयं॥ सर्वत्रयंसममष्टितयानुसंधायध्यायेदितिद्विती
यचक्रं॥ अष्टारचक्रे॥ देवदक्षिणभागस्थसमारभ्यक्रमेणपूजयेत्॥ ऐंह्रींश्रीं सर्वरोगहरच
क्रायनमः॥ इतिपुष्पांजलिंदत्वा॥ ऐंह्रींश्रीं अंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः वलक्षु
वशीकरणश्रीपादुकांपूजयामिनमः तर्पयामिनमः॥ ऐंह्रींश्रीं कंखंगंघंङं कलह्रींकामे।

श्वरश्रीपादुकांपूजयामिनमः तर्पयामिनमः ॥ ऐंह्रींसौंः चंछंजंझंञं रंवंलीमोदनश्रीपा
दुकांपूजयामिनमः तर्पयामिनमः ॥ ऐंह्रींसौंः टंठंडंढंणं पलांडुविमलश्रीपादुकांपूजयामि
नमः तर्पयामिनमः ॥ ऐंह्रींसौंः तंथंदंधंनं श्रीअरुणश्रीपादुकांपूजयामिनमः तर्पयामिन
मः ॥ ऐंह्रींसौंः पंफंबंभंमं हसक्षमलवरयऊं जयश्रीपादुकांपूजयामिनमः तर्पयामिनमः ॥ ऐं
ह्रींसौंः यंरंलंवंक्षं श्रीसर्वेश्वरश्रीपादुकांपूजयामिनमः तर्पयामिनमः ॥ ऐंह्रींसौंः शंषंसंहंलं
क्षंः नं श्रीकौलेनश्रीपादुकांपूजयामिनमः तर्पयामिनमः ॥ इतिसंपूज्यसंतर्प्य ॥ मूलेनमूलदेवं
संपूज्यसंतर्प्य ॥ ऐमितियोनिमुद्रयाप्रणमेत् ॥ सप्तमावरणम् ॥ अथान्तर्दशारचक्रे ॥ पश्चिमादिदे
वदक्षिणावर्तेनपूजयेत् ॥ ऐंह्रींसौंः सर्वरक्षाकरचक्रायनमः ॥ इतिपुष्पांजलिंदत्वा ॥ ऐंह्रींसौंः
वरदेवश्रीपादुकांपूजयामिनमः तर्पयामिनमः ॥ ऐंह्रींसौंः अभयदेवश्रीपादुकांपूजयामि
नमः तर्पयामिनमः ॥ ऐंह्रींसौंः त्रिशूलदेवश्रीपादुकांपूजयामिनमः तर्पयामिनमः ॥ ऐंह्रीं

का० ह० ३८

38

सौंः खड्गदेवश्रीपादुकां पूजयामि नमः तर्पयामि नमः ॥ ऐं ह्रीं सौंः सर्वसिद्धिप्रदाय चक्राय नमः
त्रिकोणाग्रकोणे ॥ मूलं ऐं आत्मेश्वरश्रीपादुकां पूजयामि नमः तर्पयामि नमः ॥ मूलं ह्रीं परमात्मे
श्वरश्रीपादुकां पूजयामि नमः तर्पयामि नमः ॥ मूलं सौंः अंतरात्मेश्वरश्रीपादुकां पूजयामि नमः
तर्पयामि नमः ॥ इति संपूज्य संतर्प्य ॥ मूलेन मूलदेवं संपूज्य संतर्प्य ॥ ऐमिति योनिमुद्रया प्रणमेत्
अष्टमावरणम् ॥ ऐं ह्रीं सौंः सर्वानंदमयवैंदवचक्राय नमः ॥ मूलं विद्याकामेश्वरश्रीपादुकां पू
जयामि नमः तर्पयामि नमः ॥ इति संपूज्य संतर्प्य ॥ पुनर्मूलेन त्रिः संतर्प्य ॥ इति नवमावरणम् ॥ ९ ॥
अथ वटुकादिबलिः ॥ तत्र श्रीचक्रस्य ईशाने चतुरस्रवृत्तत्रिकोणात्मकं मंडलं विधाय ॥ तत्र सज
लपात्रं निधाय ॥ वां वटुकाय नमः ॥ इति संपूज्य ॥ बलिं दद्यात् यथा ॥ ॐ ऐं ह्रीं श्रीं एह्येहि देवीपुत्र वटु
कनाथ कपिलजटाभारभास्वर त्रिनेत्र ज्वालामुख सर्वविघ्नान् नाशय नाशय सर्वोपचारसहितं
बलिं गृह्ण गृह्ण स्वाहा ॥ इति वामांगुष्ठानामिकाभ्यां बलिं दद्यात् ॥ इति वटुकबलिः ॥ आग्नेये

तथैवमंडलंकृत्वा॥साधारपात्रंनिधाय॥यांयोगिनीभ्योनमः॥इतिसंपूज्य॥बलिंदद्याद्यथा
ॐऊर्ध्वंब्रह्मांडतोवादिविगगनतलेभूतलेनिष्कलेवा॥पातालेवानलेवासलिलपवनयोः
यत्रकुत्रस्थितावा॥क्षेत्रेपीठोपपीठादिषुचकृतपदाधूपदीपादिकेन॥प्रीतादेव्यःसदानःशु
भवलिविधिनापांतुवीरेंद्रवंद्याः॥यांयोगिनीभ्यःसर्ववर्णयोगिनीभ्योहुंफट्स्वाहा॥इतिवा
मांगुष्ठमध्यमानामाभिर्बलिमुत्सृजेत्॥इतियोगिनीबलिः॥नैर्ऋतेतथैवमंडलंकृत्वा॥सा
धारपात्रंनिधाय॥क्षांक्षेत्रपालायनमः॥इतिसंपूज्यबलिंदद्याद्यथा ॐक्षांक्षींक्षूंक्षैंक्षौंक्षः॥
स्थानक्षेत्रपालधूपदीपादिसहितबलिंगृह्णगृह्णस्वाहा योस्मिन्क्षेत्रेनिवासीचक्षेत्रपालः
सकिंकरः॥सप्रीतोबलिदानेनसर्वरक्षांकरोतुमे॥इतिवामांगुष्ठतर्जनीभ्यांबलिमुत्सृजेत्
इतिक्षेत्रपालबलिः॥वायव्येतथैवपात्रंनिधाय॥गंगणपतयेनमः॥इतिसंपूज्यबलिंदद्या।
द्यथा॥ॐगांगींगूंगैंगौंगः गणपतयेवरवरदसर्वजनंमेवशमानयबलिंगृह्णगृह्णस्वाहा

का० इति वामांगुष्ठमध्यमाभ्यां वलिमुत्सृजेत् ॥ इति गणपतिवलिः ॥ उत्तरेण तथैव पात्रे सजलं नि
सू० धाय ॥ सर्वभूतेभ्यो नमः ॥ इति संपूज्य ॥ वलिं दद्याद्यथा ॥ ओं ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं
३९ स्वाहा ॥ सर्वभूतेभ्य एष वलिर्नमः ॥ इति सर्वांगुलीभिः वलिमुत्सृजेत् ॥ इति सर्वभूतवलिं द
39 त्वा ॥ प्रणाममुद्रां प्रदर्श्य ॥ दंडवत्प्रणामेन ॥ ओं सांगाय सपरिवाराय श्रीकामेश्वराय नमः इति त्रिः
संपूज्य ओं सर्वतत्त्वज्ञानविज्ञानप्रदानैकमहात्मने ॥ नमस्ते देवदेवेश सर्वभूतहितेरत ॥ अनंत
कीर्तिसंपन्न अनंतासनसंस्थित ॥ अनंतकीर्तिसंपन्न परमेश नमोस्तु ते ॥ परापरपरातीत उ
त्पत्तिस्थितिकारक ॥ सर्वार्थसाधनोपाय विश्वेश्वर नमोस्तु ते ॥ स्वभावनिर्मलाभोग सर्वव्या
धिविनाशन ॥ योगियोगिमहायोगियोगेश्वर नमोस्तु ते ॥ अंगहीनं क्रियाहीनं विधिहीनं महे
श्वर ॥ पूजितोसि मया देव तत्क्षमस्व भ्रमात्त्वकृतं ॥ यद्यप्युपहृतैः पुष्पैरपास्तैर्भावदूषितैः ॥ के
शकीटापविद्धैश्च पूजितोसि मया प्रभो ॥ अन्यथा सक्तचित्तेन क्रियाहीनेन वा प्रभो ॥ मनोवाक्का

यद्दृष्टेन पूजितोसि त्रिलोचन ॥ यच्चोपहृतमात्रेण कृतमर्घ्यादिकं मया ॥ तामसेन च भावे
न तत्त्वमस्तु मम प्रभो ॥ मंत्रेण तत्त्वहीनेन पुष्पेण विकलेन च ॥ ॐ इतः पूर्वं प्राणबुद्धिदेहधर्मा
धिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं य
दुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा ॥ मां मदीयं सकलं ईशानाय तत्समर्पये ॥ ॐ तत्सत्
संहारमुद्रया देवं स्वहृदये संहरेत् ॥ इति नालत्रयं पूर्वं ॥ देवनाथ गुरो स्वामिन् देशिक स्वात्मना
यक ॥ बाह्निकाह्निकृपासिंधो पूजां पूर्णतरां कुरु ॥ इति श्रीगुरुं प्रार्थ्य ॥ श्रीपात्रमामलकमुद्धृ
त्य शिरस्थाय श्रीगुरवे समर्प्य ॥ तत्पात्रं दक्षकरे निधाय ॥ श्रीगुरुपादुकाविद्यांते श्रीमच्छ्री अ।
मुकानंदनाथ श्रीपादुकां तर्पयामि नमः ॥ इति त्रिः संतर्प्य ॥ तत्पात्रं स्वस्थाने संस्थाप्य ॥ तज्जलं।
किंचिन्मात्रं तत्र निधाय ॥ तज्जलं पुनः पात्रांतरेण गृहीत्वा ॥ तुलकेनादाय ॥ त्रैलोक्यं लेशं निक्षि।
प्य ॥ ॐ प्रकृतिबुध्यहंकारमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्प

का॰ प॰ ४॰ 40

र्शरसरूपगंधाकाशवाय्वग्निसलिलपृथिव्यात्मकं शुद्धचतुर्विंशतितत्त्वसहितं अं आं इं ईं
उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः आत्मतत्त्वात्मकं स्थूलदेहं शोधयामि स्वाहा ॥ १ ॥ ओं माया
कलाविद्यारागकालनियतिपुरुषात्मकं शुद्धाशुद्धसप्ततत्त्वसहितं कं खं गं घं ङं चं छं जं झं
ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं ह्रीं विद्यातत्त्वात्मकं सूक्ष्मदेहं शोधयामि स्वाहा ॥ २ ॥ ओं शिव
शक्तिसदाशिवेश्वरशुद्धविद्यात्मकं पंचतत्त्वसहितं यं रं लं वं शं षं सं हं ळं क्षं सौः शिवतत्त्वा
त्मकं परदेहं शोधयामि स्वाहा ॥ ३ ॥ ओं शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाकलाविद्यारा
गकालनियतिपुरुषप्रकृतिबुद्ध्यहंकारमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूप
स्थशब्दस्पर्शरूपरसगंधाकाशवाय्वग्निसलिलपृथिव्यात्मकं शुद्धमिश्राशुद्धषट्त्रिंशत्तत्त्व
सहितं अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं
पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं ऐं ह्रीं सौः मूलं सर्वतत्त्वं स्थूलसूक्ष्मपराख्यदेहरूपाभि

मानितं जीवात्मानं शोधयामि स्वाहा॥ इति चुलकचतुष्टयं स्वीकृत्य। तत्पात्रं कराभ्यामादा
य। मूलं श्रीगुरुपादुकाविद्यां चोच्चार्य॥ ॐ प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनी स्रुचं। धर्माधर्म
कलास्नेहपूर्णमग्नौ जुहोम्यहं स्वाहा॥ इति तज्जलमश्नीयात्। ततः कराभ्यां मूर्धादिपादांतं स्व
ट्त्रिंशत्तत्वात्मकं तं भावयन् स्वदेहं स्पृशेत्। ततः स्वसामयिकैः सह यथाशास्त्रं गुरूपदिष्टवि
धिना पात्रवंदनं कुर्यात्। तत्रादौ गुरुपात्रमुद्धृत्य। श्रीगुरुपादुकां स्मरन्। यदि गुरुस्तत्रैव स्यात्त
स्मै दद्यात्। यदि न स्यात्तर्ज्येष्ठशिष्याय दद्यात्। तदभावे स्वशिरसि स्थापयेत्। ततः मूलाधारा
त्कुंडलिनीमुत्थाप्य। स्वजिह्वाग्रांतमानीय। स्वपात्रं त्रिखंडो परिस्थत्वा पठेत्। एतायां पात्रमानंद
भरितं परमेश्वरि। गुरुणा दत्तमभ्यर्च्य प्रणमेच्छिरसा तदेकमकरीत्या॥ ॐ श्रीमद्भैरवशेखरप्रवि
लसत्पंद्रामृतासावितं। तेजोधीश्वरयोगिनीगणमहासिद्धैः समाराधितं। आनंदागमकं महा
त्मकमिदं साक्षात्त्रिखंडामृतं। वंदे श्रीप्रथमं कराबुजगतं पात्रं विशुद्धिप्रदं। सामयिकेभ्योऽन्न

का० प्र० ४१ ह्रोमीत्त्वकाः॥ तेभ्यो जपस्वजघंनाय थोचितमित्तात्तां शृहीत्वा॥ आत्मतत्त्वं शोधयामि स्वाहा
ऊलकुंडलिनीमुखेज्जहयात्॥१॥ ॐ ह्रं मत्सिंधुरसावहं दयितया दत्तं चषोयादिभिः॥ किंचि
त्स्वं वलरक्तपंकजदृष्टा सानंदमुद्ध्रीलितं॥ वामे स्वाङ्गविशुद्धमुद्धिकवलं पाणौ निधायात्म।
के॥ वंदे पात्रमहं द्वितीयममुना नैवेद्यकं सर्वथं॥ विद्यातत्त्वं शोधयामि स्वाहा॥२॥ ॐ सर्वाम्नाय
कलाकलापकलितं कौलं हलोद्योतितं॥ चंद्रोपेंद्रमहेंद्रप्रांशुवरुणब्रह्मादिभिः सेवितं॥
ध्यातं देवगणैः परं मुनिवरैः मोक्षार्थिभिः सर्वदा॥ वंदे पात्रमहं तृतीयममुना स्वात्मावबोध
प्रदं॥ शिवतत्त्वं शोधयामि स्वाहा॥३॥ मद्यं मीनरसावहं हरिहरब्रह्मादिभिः पूरितं॥ मुद्रामै
थुनयुग्मकर्मनिरतं तत्त्वात्मकाश्रयं॥ आचार्यार्चितमष्टभैरवकलान्यासेन चाच्छादितं॥
पायात्संयममकारतत्त्वनिलयं पात्रं चतुर्थं त्तमः॥ प्रकृतितत्त्वं शोधयामि स्वाहा॥४॥ ॐ आधारे
भुजगाधिराजवलये पात्रं महीमंडलं॥ मद्यं मममस्तु द्वारिपिशितं चाष्टौ च दिग्दंतिनः॥

सोहं भैरवमर्चयन्प्रतिदिनं नानागणैरावृतैरादित्यप्रमुखैः स्वरास्वरगणैराज्ञाकरैः किं
करैः । गुरुषतं त्वं शोधयामि स्वाहा ॥ ५ ॥ ॐ ह्रूं चामरभद्रपीठपरमानंदोदयादायिकं । वाजी
दंतमनोहरं स्वस्त्वकरं साम्राज्यसाम्राज्यदं । नानाव्याधिभवांधकारहरणं जन्मांतरं क्षेमनं । श्री
मद्भैरवभैरवीप्रियतरं पात्रं च वषट्तं नमः । मनस्तं त्वं शोधयामि स्वाहा । ६ । ॐ जाग्रत्स्वप्नसुषुप्ति
तुर्यपरतः चैतन्यसाक्षिप्रदं । विद्युद्भास्करवह्निनिस्त्रयत्रयधं ज्योतिष्कलाव्यापिनं । वामापिंगल
मध्यगात्रिवलयासत्कुंडलीबोधगं पात्रं समममस्मरणेन तरुणानंदप्रदं पात्रमां । बुद्धिं तं त्वं शो
धयामि स्वाहा ॥ ७ ॥ ॐ खं श्रीगुरुपादुकांच तिलकं केके हि मारस्वतं । शाक्तोर्वाग्बलशौर्यबुद्धिह
रणं देहस्थितेः कारणं । वांछासिद्धिकरं मनःस्थितिकरं वश्यं जगद्योषितां । पात्रं चाष्टममष्ट
सिद्धिकरणं प्रौढप्रसन्नं भजे । अहंकारं तं त्वं शोधयामि स्वाहा ॥ ८ ॥ ॐ सर्वानंदकरं सदाशिव
पदं सर्वार्थसंपत्प्रदं । साम्राज्यार्थकरं समस्तसुखदं चाज्ञानविध्वंसनं । आद्यः कांतियशोवि

का. ए. वर्धनकरं संसारमोहच्छिदं पात्रं लक्षगुणात्मकं चनवं मे प्रौढप्रतापं भजे ॥ शक्तितत्त्वं शो
धयामि स्वाहा ॥ ९ ॥ ॐ ब्रह्माविष्णुमहेशानां देवानां च विशेषतः ॥ दुर्लभं पावनं पात्रं दशमं प्र
४२ णमाम्यहं ॥ भैरवतत्त्वं शोधयामि स्वाहा ॥ १० ॥ ॐ पापघ्नं शान्तिशुभदं दिव्यं स्वादुसुखालयं ॥ पा
42 त्रमेकादशं वंदे शुभं सेवासुखागतं ॥ सर्वतत्त्वं शोधयामि स्वाहा ॥ ११ ॥ इति पात्रवंदनम् ॥ अथ प्रा
णाहुतित्रयं ॥ ॐ यस्मीय मे हृदि दीमे स्वात्माग्नौ मनसा स्रुचा सुषुम्णावर्त्मना नित्यमक्षवृ
त्तीर्जुहोम्यहं स्वाहा ॥ ॐ प्रकाशाकाशहस्ताभ्यामवलेख्योन्मनीस्रुचं ॥ धर्माधर्मकलास्नेह
पूर्णं वह्नौ जुहोम्यहं स्वाहा ॥ ॐ अन्तर्निरन्तरनिरिंधनमेधमाने मायान्धकारपरिपन्थिनि सं
विदग्नौ ॥ कस्मिंश्चिदद्भुतमरीचिविकासभूमौ विश्वं जुहोमि वसुधादिशिवावसानं स्वाहा ॥
सकलतत्त्वं शोधयामि स्वाहा ॥ इति प्राणाहुतित्रयं ॥ इति पात्रवंदनं ॥ स्वसामयिकान्संतर्प्य ॥ त
तः स्निग्धभूमौ जलेन बिन्दुत्रिकोणमण्डलं विधाय ॥ तदुपरि निष्कलबीजं वामहस्तकनिष्ठ

कयाविलिख्य॥ तर्पणं कुर्याद्यथा॥ ॐ नमो नमो देवताभ्यो मातृभ्यश्च नमो नमः॥ डाकिनी
भ्यः शाकिनीभ्यो हाकिनीभ्यो नमो नमः॥ इति पठन् तर्पणं कुर्यात्॥ अंगुष्ठयोगेन पात्रं च पाणिभ्यां॥ स्व
स्मिं संस्थापयेत्॥ ततः पूर्वस्थापितबलिपात्रस्य मन्त्रादिकमेकस्मिन्पात्रे कृत्वा॥ तज्जह्राडस्या
यसोदकपात्रहस्तो बहिर्गत्वा॥ जलेन शुचौ देशे चतुरस्रं कृत्वा त्रिकोणात्मकं मंडलं कृत्वा॥ त
त्रगदात्रिशूलडमरुपात्रहस्तं त्रिलोचनं॥ कृष्णाभं भैरवं देवं सर्वविघ्नविनाशनं॥ इति उच्छिष्ट
भैरवं ध्यात्वा॥ गंधादिना संपूज्य॥ ॐ ऐं ह्रीं श्रीं उच्छिष्टभैरव एह्येहि बलिं गृह्ण गृह्ण हुं फट् स्वा
हा॥ इति पात्रस्थं बलिद्रव्यं तत्र मंडले विसृज्य॥ तत्पात्रे हस्तौ पादौ प्रक्षाल्याचम्य॥ तत्पात्रं जलेन ना
पूर्य॥ पृष्ठतो गृहद्वारं गत्वा॥ उदयोस्तु इति ब्रुवन् ततः॥ प्रविश्य स्वासने समुपविश्य॥ तत्पात्रस्थज
ले विशेषार्घ्यजलबिंदुं दत्वा॥ तेन जलेन स्वात्मानमभिषिंचन्॥ ॐ नश्यंतु प्रेतकूष्मांडाना
शंपंतु दूषका नराः॥ साधकानां शिवः संतु आम्नायपरिपालिनां॥ जयंतु मातरः सर्वाः जयं

का० पृ० ४३ तु योगिनीगणाः॥ जयंतु सिद्धडाकिन्यो जयंतु गुरुपंक्तयः॥ २॥ नंदंतु अणिमासिद्धा नंदंतु
भैरवादयः॥ नंदंतु देवताः सर्वाः सिद्धविद्याधरादयः॥ ३॥ ये चाम्नायविशुद्धाश्च मंत्रिणः शुद्धबु
द्धयः॥ सर्वार्थानंदहृदयाः नंदंतु मम भक्तितः॥ ४॥ नंदंतु आणिग्रहा योगाः करणाश्च तथा परे॥ स
र्वे ते सुखिनो यांतु मासाश्च तिथयस्तथा॥ ५॥ तर्पयंतु पितरः सर्वे ऋतवो वत्सरादयः॥ भूचराः खेचरा
श्चैव तर्पयंतु मम भक्तितः॥ ६॥ अंतरिक्षचरा ये च ये चान्ये देवयोनयः॥ सर्वे ते सुखिनो यांतु सर्वा नद्य
श्च पक्षिणः॥ ७॥ पशवस्तरवश्चैव पर्वताः कंदरा गुहाः॥ ऋषयो ब्राह्मणाः सर्वे शांतिं कुर्वंतु मे सदा॥ ८
तोयानि पशवो गावो ये चान्ये पुण्यभूमयः॥ वृद्धाः पतिव्रता नार्यः शिवं कुर्वंतु मे सदा॥ ९॥ शिवं सर्वे
त्र मे वास्तु पुत्रदारधनादिषु॥ राजानः सुखिनः संतु ते मम मार्गी स्तु मे सदा॥ १०॥ शुभा मे दिवसा यां
तु मित्रा स्निग्धं तु मे शिवः॥ साधका जयिनः संतु शिवाः स्निग्धं तु पूजकाः॥ ११॥ ये ये पापधियास्तब्धू
षणरताः सन्निंदकाः पूजने॥ देवाचारविसर्गनष्टहृदया उच्छास्त्रयेवादकाः॥ दृष्ट्वा चक्रमपूर्व

43

जातस्तु दयायै कौलिकाद्वेषकाः ॥ ते ते यांतु विनाशमत्र समये श्रीभैरवस्याज्ञया ॥१२॥ द्वे
ष्टारः साधकानां च सर्वदेवाम्नायदूषकाः ॥ डाकिनीनां मुखे यांतु सर्वास्ते पिशितैः स्तुताः ॥१३॥ श
त्रवो नाशमायांतु मम निंदाकराश्च ये ॥ द्वेष्टारः साधकानां च विनश्यंतु शिवाज्ञया ॥१४॥ ये निंदका
स्ते प्रलयं प्रयांतु ये साधकास्ते प्रभवंतु सिद्धाः ॥ सर्वत्र देवी करुणावलोकात्परात्परेशी मम सं
निधत्तां ॥१५॥ इति शांतिस्तोत्रं ॥ श्रीभैरव उवाच ॥ देवि वक्ष्यामि संज्ञां ते शांतिस्तोत्रमनुत्तमं ॥ वीराये
न परानंदपदं प्राप्स्यति निस्पृहः ॥१॥ योगिनीचक्रमध्यस्थं मातृमंडलवेष्टितं ॥ नमामि शिरसा ना
थं भैरवं भैरवीप्रियं ॥२॥ अनादिघोरसंसारव्याधिध्वंसैकहेतवे ॥ नमः श्रीनाथदेवाय कुलौघफलप्र
दायिने ॥३॥ आपदो दुरितं रोगाः समयाचारलंघनात् ॥ ये सर्वेऽत्र व्यपोहंतु दिव्यचक्रस्य मेलनात् ॥४॥
आयुरारोग्यमैश्वर्यं कीर्तिर्लाभः सुखं जयः ॥ कांतिर्मनोरथश्चास्तु यांतु सर्वाश्च देवताः ॥५॥ संघज
कानां प्रतिपालकानां यतींद्रयोगींद्रतपोधनानां ॥ देशस्य राष्ट्रस्य कुलस्य राज्ञः करोतु शांतिं ।

का॰
पृ॰
४४

५५

भगवान्कुलेशः ॥६॥ नंदंतु साधककुलान्वयदर्शिका ये स्वस्वाम्नायनाम्नावतरूपमहान्वया ये
नंदंतु सर्वकुलकौलरताः परे ये ऽप्यन्ये विशेषपदभेदकशांभवा ये ॥७॥ नंदंतु सिद्धगुरवः स्वगु
रुक्रमौघाः ज्येष्ठानुगाः समयिनो वटुकाः कुमार्यः ॥८॥ षट्योगिनीप्रवरवीरकुलप्रसूता नंदंतु भू
मिपतयो द्विजसाधुलोकाः ॥९॥ नंदंतु नीतिनिपुणा निरवद्यनिष्ठा निर्मत्सरा निरुपमा निरु
पद्रवाश्च । नित्या निरंजनरता गुरवो निरीहाः शाक्ताश्च शांतमनसो हृतशोकशंकाः ॥१०॥ नंदंतु ।
योगनिरताः कुलयोगयुक्ता आचार्यसामयिकसाधकपुत्रकाश्च । गावो द्विजा युवतयो यतयः
कुमार्यो धर्मे भवंतु निरताः गुरुभक्तियुक्ताः ॥११॥ नंदंतु साधककुलान्यणिमाद्यनिष्ठा शापः पतंतु
समयद्विषि योगिनीनां साशांभवी स्फुरतु कापि ममाद्यवस्था यस्यां गुरोश्चरणपंकजमेव ।
लभ्यं ॥१२॥ याश्चक्रक्रमभूमिकावसतयो नाडीषु यासंस्थिता याः कायद्रुमरोमकूपनिलया
यासंस्थिता धातुषु । उच्छ्वासोर्मिमरुत्तरंगनिलया निश्वासवासाश्च यास्ता देव्यो रिपुभक्ष्या ।

भक्त्याणपरास्तुष्यंतु कौलार्चिताः ॥१२॥ यादिव्यक्रमपालिकाः क्षितिगता या देवतास्तोयगा
या नित्यं प्रथितप्रभाः शिखिगता या मातरिश्वाश्रया ॥ या व्योमामृतमंडलामृतमया या सर्वगाः
सर्वदा ॥ ताः सर्वाः कुलमार्गपालनपराः शांतिं प्रयच्छंतु मे ॥१३॥ ऊर्ध्वब्रह्मांडतो वा दिवि गगनत
ले भूतले निस्तले वा पाताले वानले वा पवनसलिलयोर्यत्र कुत्र स्थिता वा ॥ क्षेत्रे पीठोपपीठा
दिषु च कृतपदाः धूपदीपादिमांसैः ॥ प्रीता देव्यः सदा नः शुभबलिविधिना पांतु वीरेंद्रवंद्याः ॥
ब्रह्माण्यीशेशदुर्गागुहहरवटुकगणाभैरवाः क्षेत्रपाला ॥ वेतालादित्यरुद्राद्यहरवसुमनसिद्धा १४
स्सरोगुह्यकाद्याः ॥ भूतागंधर्वविद्याधरऋषिपितृयक्षासुराहिप्रभूता ॥ योगीशाश्चारणाः किं
पुरुषनरसुराश्चक्रगाः पांतु सर्वे ॥१४॥ मंत्रं चेद्गुरुवाक्यमेव पितृदेवाः सोपि वद्योगिनीप्रीति
क्षेत्रं परदेवताश्च यदि वेद्वेदाः प्रमाणं च चेत् ॥ शाक्तोयं यदि दर्शनं भवति चेद्राज्ञे यमेघास्ति चे
त्तांपत्रापि च कौलिकाश्च यदि चेत्सान्येन यः सर्वदा ॥१५॥ तुष्यंतु मातरः सर्वाः समुद्राः सग

का॰
स्त॰
४५

णाधिपाः॥ योगिन्यः क्षेत्रपालाश्च मम देहे व्यवस्थिताः॥ १४॥ शिवाद्यवनिपर्यन्तं ब्रह्मादिस्त
म्भसंयुतं॥ कालाग्न्यादिशिवान्तं च जगद्यज्ञेन तृप्यतु॥ १५॥ इति शान्तिस्तोत्रं॥ अथ वीरवंदनस्तो
त्रं॥ ॐ पठित्वेदं नमेहीराज्ञो वीरवंदनमाचरेत्॥ स्वदेहे हीराज्ञमेदीराज्ञं च सिद्धिः प्रजायते॥ १॥ जग
त्त्रयाभ्यर्चितशासनेभ्यः परार्थसंपादनकोविदेभ्यः॥ समस्तक्लेशमहोरगेभ्यो नमो नमः सा
धकनायकेभ्यः॥ १॥ प्रहीनसर्वाश्रयवासनेभ्यः सर्वार्थतत्त्वोदितसाधनेभ्यः॥ सर्वप्रजाम्बुहर
णोदितेभ्यो नमो नमः साधकनायकेभ्यः॥ २॥ निस्तीर्णसंसारमहार्णवेभ्यः त्रस्तालतोन्मूल
नतत्परेभ्यः॥ जरारुजामृत्युनिवारकेभ्यो नमो नमः साधकनायकेभ्यः॥ ३॥ सद्धर्मरत्नाकर
भाजनेभ्यो निर्वाणमार्गोत्तमदेशिकेभ्यः॥ सर्वत्रसंपूर्णमनोरथेभ्यो नमो नमः साधकना
यकेभ्यः॥ ४॥ लोकानुकंपास्फुदितादरेभ्यः कारुण्यमैत्रीपरिभावितेभ्यः॥ सर्वार्थचर्यापरि
हरकेभ्यो नमो नमः साधकनायकेभ्यः॥ ५॥ विध्वस्तनिःशेषकुवासनेभ्यो ज्ञानाग्निनादग्ध

मलैथनेभ्यः॥प्रज्ञाप्रतिज्ञापरिहरकेभ्यो नमो नमः साधनायकेभ्यः॥६॥सर्वार्थिनाशापरि
हरकेभ्यो वैनेयपद्माकरबोधकेभ्यः॥विस्तीर्णसंसारगुणाकरेभ्यो नमो नमः साधकनायके
भ्यः॥७॥अनंतकर्मार्जितशासनेभ्यो ब्रह्मेन्द्ररुद्रादिनमस्कृतेभ्यः॥परस्परानुग्रहकारकेभ्यो
नमो नमः साधनायकेभ्यः ८ विभग्नभूतादिमहाभयेभ्यो मपंचकाचारपरायणेभ्यः॥समस्त
सौभाग्यकलाकरेभ्यो नमो नमः साधकनायकेभ्यः॥९॥विभग्नदुष्कर्मनवासनेभ्यः समंततोऽन्त
ष्टमहायशेभ्यः॥लभ्यामलज्ञानकृतास्पदेभ्यो नमो नमः शांभविशांभवेभ्यः॥१०॥सर्वांगमावा
प्तिमहाप्तवेभ्यः श्रीचक्रपूजार्थपरायणेभ्यः॥श्रीवीरचर्याचरणक्षणेभ्यो नमो नमः शांभवि
शांभवेभ्यः॥११॥श्रीमंत्रकोटिद्युतिभूषणेभ्यो द्वात्रिंशदुल्लासदशातिगेभ्यः॥अद्वैततत्त्वाश्रितभा
जनेभ्यो नमो नमः शांभविशांभवेभ्यः॥१२॥षट्त्रिंशतालक्षणभूषितेभ्यः श्रोतकुलपद्माकरलो
चनेभ्यः॥प्रतप्तचामीकरविग्रहेभ्यो नमो नमः शांभविशांभवेभ्यः॥१३॥सर्वोपर्यंसमारस्तसंस्थि

का. तेभ्यः संसारनिर्वाणनिदर्शनेभ्यः॥ महाकृपावेष्टितमानसेभ्यो नमो नमः शंभविशंभवेभ्यः॥ १४
रु. परैकविज्ञानरसाकुलेभ्यो वामाश्रिताचारभयानकेभ्यः॥ स्वातंत्र्यविध्वस्तजगत्तमोभ्यो नमो
४८ नमः शंभविशंभवेभ्यः॥१५॥ श्मशानचर्याभमहाफलेभ्यो मोहांधकारापहृतिक्षमेभ्यः॥ पर
46 स्वराज्यपरिपालकेभ्यो नमो नमः शंभविशंभवेभ्यः॥१६॥ विमुक्तकेशालिकपालकेभ्यः स्फुराम
वारक्तविलोचनेभ्यः॥ नवीनकांतारततत्परेभ्यो नमो नमः शंभविशंभवेभ्यः॥१७॥ विभूतिलि
प्तांगदिगंबरेभ्यः श्मशानाग्निश्मालिभयानकेभ्यः॥ कपालपात्रामृतपानकेभ्यो नमो नमः भैरवि
भैरवेभ्यः॥१८॥ सिद्ध्यष्टकादानमहाप्रभुभ्यः श्रीभैरवाचाररतानदेभ्यः॥ स्वाधीनतात्यक्तृतनि
जैरेभ्यो नमो नमः भैरविभैरवेभ्यः॥१९॥ प्रशांतशास्त्रार्थविचारकेभ्यो निहत्यनानारसकाव्यके
भ्यः॥ निरस्तनिःशेषविकल्पनेभ्यो नमो नमः भैरविभैरवेभ्यः॥२०॥ स्वात्मैकभावांतरिताशये।
भ्यः सायुज्यसाम्राज्यसुखाकरेभ्यः॥ श्रीमच्चिदानंदितविग्रहेभ्यो नमो नमः भैरविभैरवेभ्यः॥२१

पराप्रसादास्यदमानन्देभ्यो ब्रह्मादयस्तानरमाकुलेभ्यः॥ शिवोऽहमित्याश्रितचेतनेभ्यो नमो नमः
श्रीरविभैरवेभ्यः॥२२॥ सर्वथा सर्वदा सर्वे सार्वं चरणपद्मादि सन्। जगज्जननि तद्विस्तारं ब्रह्मेदमिति विद्म
हे॥२३॥ अहमेव परोहंसः शिवः परमकारणं। मत्प्राणे सकलपश्चात्मालीनः समरसं गतः॥२४॥ सच्चिदा
नंदनिलयं परापरमकारणं। शिवाद्वयप्रकाशांशप्रश्यामलं धाममयी महि॥२५॥ अनेन वीरस्तवकीर्त।
नेन समस्तहृतक्लेशस्तवासनोऽहं। संसारकान्तारमहार्णवेस्मिन्निमज्जमानं जगदुद्धरेयं॥२६॥ नंदन्तु सा
धकाः सर्वे विनश्यन्तु विदूषकाः। अवस्था शांभवी मेस्तु प्रसन्नोस्तु गुरुः सदा॥२७॥ इति पठन् सर्वान्सा
मयिकानभिषिंच्य॥ विशेषार्घ्यपात्रमुद्धृत्य॥ शिरसि स्थिताय॥ गुरवे समर्प्य॥ तत्पादुकाभिः समभ्य
र्च्य॥ मूलविद्यया गुरुपादुकाविद्यां तेन स्वाहेति॥ स्वमूलाधारकुंडलिन्यात्मकपरदेवतामुखे हु
वनत्रह्मा॥ शेषं प्रियशिष्याय प्रसादत्वया किंचिद्दद्यात्॥ सोपि स्वपात्रे कृत्वा तज्जलं प्राश्नीयात्
३स्यं न्वर्च्य प्रतिपत्तिः॥ ततः स्वगुरूपदिष्टविधिना शेषचक्रं तं समापयेत्॥ ततस्तस्माद्दिपात्रेषं

का. पू. ५७
47

यपुष्पाक्षतान्वितंतज्जलमादाय ॥ ॐ नमो विवस्वते ब्रह्मन्भास्वते विष्णुतेजसे ॥ नमःसर्वब्रह्मव
यसविशेकर्मदायिने ॥ ह्रां ह्रीं हूं सः सूर्य एष तेऽर्घ्यः स्वाहेति सूर्यायार्घ्यं दत्वा ॥ कृतांजलिः ॥ ॐ य
त्नछिद्रं तपश्छिद्रं यच्छिद्रं पूजने मम ॥ सर्वं तदच्छिद्रमस्तु भास्करस्य प्रसादतः ॥ इत्यच्छिद्रमव
धारयेत् ॥ ततः मूलेन प्राणायामत्रयादिकरषडंगन्यासान्विधाय प्रागुक्तश्रीगुरुस्तोत्रं पठि
त्वा ॥ श्रीगुरुं प्रणम्य ॥ मूलेन निर्माल्यं शिरसि धृत्वा ॥ मूलविद्यैव चरणोदकं स्वीकृत्य ॥ श्रीकामे
श्वरभक्तेभ्यो नैवेद्यादिकं विभज्य दत्वा स्वयमपि भुक्त्वा ॥ स्वात्मानं कामकलारूपं विभावयन्
सुखं विहरेत् ॥ इति श्रीकामेश्वरनित्यपूजापद्धतिः समाप्तम् ॥

का. स्तो. १

ॐ श्रीकामेश्वरभैरवाय नमः ॥ श्रीदेव्युवाच ॥ भगवन्सर्वधर्मज्ञ सर्वकामवरप्रद ॥ भक्ताभव
त्प्रसादेन कृतार्थास्स्युर्जनाः प्रभो ॥१॥ कामेश्वरस्य देवस्य स्तोत्रं वद महेश्वर ॥ मंत्रगर्भं महेशान
सर्वसिद्धिप्रदं कलौ ॥२॥ श्रीभैरव उवाच ॥ देवि वक्ष्यामि स्तोत्रं ते सर्वसिद्धिप्रदायकं ॥ मूलमंत्रै
क सर्वस्वं रक्षणीयं प्रयत्नतः ॥३॥ दीक्षाकाले च पूजायां जपान्ते यः पठेद्धि वै ॥ विसर्जने तथा ध्या
ने स दीक्षाफलमश्नुते ॥४॥ अस्य श्रीकामेश्वरस्तोत्रराजस्य ॥ दक्षिणामूर्तिऋषिः ॥ पंक्तिश्छंदः ॥ श्रीं
बीजं ॥ ह्रीं शक्तिः ॥ क्लीं कीलकं ॥ धर्मार्थकाममोक्षार्थे पाठे विनियोगः ॥ अथ ध्यानं ॥ पीयूषांशु
शिरोमणिं करतलैः खड्गं त्रिशूलं तथा ॥ बिभ्राणं च वराभये त्रिनयनं देवं शशिकोटिभं ॥ रा
जंतं प्रभया परात्परमया देव्या समं शोभितं ॥ श्रीकामेश्वरमप्रमेयफलदं सर्वेश्वरं भावय ॥६॥
वाग्भवं परममाद्यवर्णं यो जपेन्नवमनाममरेशं ॥ सो भवेज्जगति मानवतीनां कामदेववर
वचित्तप्रमाथी ॥७॥ मदनं मदनात्तरं जपेन्नवमंत्रेण मनो जपेत्सदा ॥ स भवेत्स्मरनायको महीया

न्यरलोके इह चैव भवेद्धीमान् ॥८॥ शक्तिं ध्यायेद्गतिप्रक्रोजपेद्यो मंत्री मंत्रे वर्तमानेन ।
वेश ॥ कामं रामारमणीयं सदैव लक्ष्मीकांतः स भवेन्मानुषेंद्रः ॥९॥ नारं जपेद्यो ऽश्ववने शमं
त्रीसदैव ध्यायं स्तव ध्यानमेश ॥ भवेत्सदैवारिकुलप्रहंता स सर्वभूमो रथिपो महेश ॥१०॥
लक्ष्मीं जपेद्यस्तवमंत्रमध्ये प्रभातकाले नियतो मनीषी ॥ सदैव पूज्यः स्मरसुंदरीणां ल।
क्ष्मैकनाथः स भवेन्नरेशः ॥११॥ मायां यो जपेत्सदा तव मनौ ध्यायंश्च ध्यानं तव श्रीकामे।
श्वर भक्तिमांश्चरणयोः स्वजापरो हर्निशं ॥ नस्यश्रीर्न शहाद्ये निरिप्रहाश्च मेश्वरः स भवे
लक्ष्मीवान्न नपुत्रवान्समष्टिमान्विधेश्वरः सर्वदा ॥१२॥ आदिकूटमन्त्रैकनिधानं यो जपेत्तु
षत्रिदेव सदैव ॥ स भवेन्नरवरार्चितपादः किं पुनर्मंत्रवृद्धदेशिकश्रेष्ठः ॥१३॥ कूटं मध्येयं त
वमंत्रमध्ये प्रवर्तमानं जपते प्रमान्यः ॥ लक्ष्मीर्वशेन तस्य गृहे समग्रा भवंति वश्या अपि सिद्ध
योगैः ॥१४॥ कूटं तृतीयं तव साधके यो जपेन्नदेवेश मनो प्रमान्यः ॥ सवैरिरिक्तो रमते च रुद्रा

का॰
स्तो॰
२

2

जनावलीमानवदेवदेवः ॥१५॥ प्रणवं जपयेत्प्रणवेशनवमंत्रपरं मनसा यस्त्वमीश ॥ वदनां
ऊशनः स वादिमध्यैककविश्रेष्ठस्समस्तलोके ॥१६॥ भूतिं जपेद्यः शिवभूतिकामी मंत्रेश मंत्रे
नववर्तमानं ॥ लक्ष्मीः स्थिता तस्य गृहे स देवकवीश्वराणां कविता वरीयां ॥१७॥ परां जपेद्यः प
रमार्थबीजं स देवकामेश्वरकामकामी ॥ गद्यादिपद्यामृतवर्षिणी वाग्वक्त्रे विभो तस्य करा
स्थिता श्रीः ॥१८॥ वेदादिं नादबिंदुस्फुरितपशिकलालंकृतं मंत्रमूलं ॥ यो ध्यायेन्मोपवर्गी
ध्ययनविरहितो मंत्रमध्येन वेश ॥ वागीशो पीश्वरो सौ त्रिभुवनवलयः सर्वकामेश्वर श्रीः ॥
वादीवादिषु पंडितः स्वकविता सर्वेष्टसिद्धेश्वरः ॥१९॥ शक्तिबीजममरेशवेदितं यो जपेन्नव
मनो हृदि संस्थ ॥ सुरगर्चितपदः स सार्धकैर्दैशिकेश्वरवरो भवेत्समानः ॥२०॥ कामराजमनि
शं स्मरात्तरो यो जपेन्नहृदि मन्त्रेशनायकं ॥ अप्सरोभिः कमनीययौवनो स भवेत्स्मरवरो वाप
रः समानः ॥२१॥ वाग्बीजं जपेत्स सदा नवमनो यो मूढधीर्दुर्गतिः ॥ श्रीकामेश्वरपादध्यानमनिश

ध्यायन्मनासाधकः। वागीशीपरमार्थध्यानसमनात्तस्याथिवक्त्राम्बुजा। लक्ष्मीस्तस्यसदा
गृहेवसतिवैसर्वेष्टकामार्थदा। २२। इतिस्तोत्रेदिव्येसकलमन्त्रराजैकनिकषेपठेद्यःप्रजा
यांशिवशिवगृहेवार्चनविधौ। रणेजित्वाशत्रून्भजतिनृपलक्ष्मीस्वमहसा। भवेदन्तेवीरः
सकलसुरसेव्यःशिवमयः। २३। इतिमन्त्रमयंस्तवंपठेच्छ्रीदिकामेश्वरवर्णनप्रभाते। कमा
लाविमलाशयस्यतस्यश्रुतिशीलस्यवशीभविष्यति। २४। इतीदंस्तोत्रमीशानिमूलमन्त्रमयं
परं। तवभक्त्यामयाख्यातंगोपनीयंमुमुक्षुभिः। २५। अदेयंपरमंतत्त्वंमहापातकनाशनं। महा
मन्त्रमयंविद्यासाधकैकरसायनं। २६। त्रैलोक्येसारभूतंतच्चत्रैलोक्याभयदायकं। पठेन्निशीथे
मन्त्रीतुविद्यासिद्धिर्भवेत्कलौ। २७। चतुष्पथेर्धरात्रेतुश्मशानेवापिशून्यके। पठित्वाकौलिकादे
विभवेद्भैरवसन्निभः। २८। गोप्यंगुह्यंसदागोप्यंपंचांगंसुरसुंदरि। तवस्नेहान्मयाख्यातंनाख्ये
यंयस्यकस्यचित्। २९। विनाशिष्यायनोदद्यात्साधकायविनातथा। विनादानेननदातव्यंविना

का॰ दानं न ग्राहयेत् ॥ ३० ॥ अनया सिद्धिहानिः स्यात्सर्वदा दानमाचरेत् । कामेश्वरस्य सर्वस्वं रहस्यं
स्तो॰ परमाद्भुतं ॥ ३१ ॥ तद्गृहे निश्चला लक्ष्मीर्दासीव वसतिं चरेत् । नाग्निभीतिर्न दारिद्र्यं न रोगो नाप्युप
३ द्रवाः ॥ ३२ ॥ न राजभीतिर्न शोकः सदा सर्वार्थसंपदः । इदं तत्त्वं हि तत्त्वानां रहस्यं देव दुर्लभं ॥ ३३ ॥ अ
दातव्यमभक्ताय न दातव्यं दुरात्मने । श्रीदेव्युवाच । भगवन्सर्वतत्त्वज्ञ सर्वलोकहिते रत ॥ ३४ ॥
क्रीतास्मि भवतानेन कथनेनास्य शंकर । किंकरीभावमापन्ना दास्यस्मि भगवंस्तव ॥ ३५ ॥ महा
कामेश्वरस्यास्य श्रुत्वा पंचांगमुत्तमं । मयानंदः परमानंदो दास्य ह्येतेन ब्रवीमि किं ॥ ३६ ॥ श्रीभैर
व उवाच ॥ एतद्रहस्यमखिलं सर्वतंत्रेषु गोपितं । देवानामप्यलोक्यं ते शास्त्रविदितं कथितं मया
देवानां दुर्लभं तत्त्वं सर्वस्वं मम पार्वति । अप्रकाश्यमदातव्यमवक्तव्यं महेश्वरि ॥ ३७ ॥ देयं
शिष्याय शांताय गुरुभक्तिपराय च । दानशीलाय भक्ताय कौलमार्गरताय च ॥ ३८ ॥ दत्त्वा
मुक्तिं लभे देवि भक्तानां सुखदायकं । इतीदं परमं तत्त्वं तत्त्वानां तत्त्वमुत्तमं ॥ ३९ ॥ गुह्यातिगुह्य

हं चं पं वां गं परमेश्वरि ॥ सर्वथा सर्वदा गोप्यं गोपनीयं स्वयोनिवत् ॥ ४० ॥ इत्येष पटलो देवि
सारभूतो महेश्वरि ॥ सर्वसिद्धिप्रदो भूमौ देवानामपि दुर्लभः ॥ ४१ ॥ मयाख्यातः नवस्नेहाद्गोपनी
यः प्रयत्नतः ॥ प्रदातव्योप्यदृष्टेभ्यो दीक्षाहीनाय पार्वति ॥ ४२ ॥ अभक्तेभ्योपि पुत्रेभ्यो दत्त्वा नरकमा
प्नुयात् ॥ तस्मात्सर्वप्रयत्नेन गोपनीयो महेश्वरि ॥ ४४ ॥ यावज्जन्मो भवेन्नत्र तावत्सर्वेष्टसिद्धयः ॥ ४ ५
इति श्रीविश्वसारोद्धारे श्रीकामेश्वरस्तोत्रं सम्पूर्णं समाप्तम् ॥ ॥ शुभमस्तु लेखकपाठका
योः